XXXXXXXXXXXXXXXXXXXXXXXXXXXXXXXXXXXXXXXXXXXXXXXXXXXXXXXXXXXXXXXX
XXXXXXXXXXXXXXXXXXXXXXXXXXX
X
X e-text created by muktabodha indological research institute
X
X "sivadharma
X
X copied from ms no r 2442 belonging to g. o. n. l. , madras.)
X
X IFP transcript no. 860
X
X this "sivadharma differs from the text of the same name in transcript no. 72.
X   there the colophon reads: "srii"sivadharma"saastre nandiprokte
X the colophon of this version reads simply "srii"sivadharma"saastre
X
X data entered by the staff of muktabodha under the supervision of mark s. g. dyczkowski
X
X licenced for use under the creative commons attribution non-commercial licence
X
X revision 0 april 5, 2010
X
XXXXXXXXXXXXXXXXXXXXXXXXXXXXXXXXXXXXXXXXXXXXXXXXXXXXXXXXXXXXXXXX
XXXXXXXXXXXXXXXXXXXXXXXXXXX

शिवधर्मः

ॐ महागणपतये नमः ॥ हरिः ॐ ॥ अविघ्नमस्तु । श्रीगुरुभ्यो नमः ॥

ॐ नमः शिवाय ॥

सर्वाकारमशेषस्य जगतः सर्वदा शिवम् ।

गो ब्राह्मणनृपाणां च शिवं भवतु सर्वदा ॥

शिवमादौ शिवं मध्ये शिवमन्ते तथैव च ।

सर्वेषां शिवभक्तानामनुगानां च नाशिवम्? ॥

मेरुपृष्ठे सुखासीनमृषिसंघैः समावृतम् ।
लोकानुग्रहकं शान्तं सर्वज्ञं नन्दिकेश्वरम् ॥

तेषां मध्ये समुथाय मुनिर्ब्रह्मसुतोत्तमः ।
सनत्कुमारः सुतपाः पृच्छतिस्मयया विधि ॥

भगवन् सर्वधर्मज्ञ शिवधर्मपरायण ।
श्रोतुकामः परं धर्ममिमे सर्वे समागतम् ॥

अग्निष्टोमादयो धम्रा यज्ञाः बहुवित्तकृतान्विताः ।
नात्यन्तफलभूयिष्ठा बह्वायाससमन्विताः ॥

न शक्यास्ते यतः कर्तुमल्पवित्तैर्द्विजातिभिः ।
सुखोपायमतो ब्रूहि सर्वकामार्थसाधकम् ॥

हिताय सर्वसत्वानां शिवधर्मं सनातनम् ।

येन सिद्धाः सुरादैत्या गन्धर्वोरगराक्षसाः ॥

ऋषयः किन्नरायक्षास्तथा किं पुरुषादयः ।
गणाश्च विविधान्यान्ये शिवधर्मपरायणाः ॥

यं सम्पूज्यनरास्सर्वे तद्भक्ताश्शिवधर्मिकाः ।

श्रीनन्दिकेश्वर उवाच

श्रूयतामभिधास्यामि सुखोपायं महाफलम् ।
परमं सर्वधर्माणां शिवधर्मं सनातनम् ॥

शिवेन कथितं पूर्व पार्वत्याष्षण्मुखस्य च ।
गणानां देवमुख्यानामस्माकं च विशेषतः ॥

अज्ञानार्णवमग्नानां सर्वेषां प्राणिनायम् ।
शिवधर्मोऽुपः श्रीमानुत्तारार्थमुदाहृतः ॥

यैरयं शान्तचेतस्कैश्शिवभक्तैश्शिवार्थिभिः ।
सं सेव्यते परोधम्रस्ते रुद्रा नात्र संशयः ॥

ग्रामे वा यदिवारण्ये जले वापि स्थलोऽपिवा ।
यत्र वा दृश्यते लिङ्गं सर्वतीर्थानि तत्र वै ॥

पू। २(५)

एककालं द्विकालं वा त्रिकालं नित्यमेव वा ।
ये स्मरन्ति विरूपाक्षं ते रुद्रा नात्रसंशयः ॥

कीर्तयिष्यन्ति ये रुद्रास्सकृदप्याशु ते नराः ।
सर्वपापैः प्रमुच्यन्ते सर्वजन्मकृतैरपि ॥

येऽर्चयन्ति सदारुद्रं न ते प्रकृतिमानुषाः ।
रुद्रलोकात्परिभ्रष्टास्ते रुद्रा नात्रसंशयः ॥

जातेन देहिना येन नार्चितोभगवाञ्छिवः ।
स चिरं संचरत्यस्मिन् संसारे दुःखसागरे ॥

तस्य चित्तम् महाच्छिद्रं सम्भोगस्स्वार्थमूकता ।
यः क्षणं वा मुहूर्तं वा शर्वमेकं न चिन्तयेत् ॥

दुर्लभं प्राप्यमानुष्यं येऽर्चयन्ति सदाशिवम् ।
तेषां हि सफलं जन्म कृतार्थास्ते नरोत्तमाः ॥

भवभक्तिपराये तु भवं प्रणतचेतसा ।
भवसंस्मरणोद्युक्तास्तेन दुःखस्य भागिनः ॥

भवनानि मनोज्ञानि विभ्रमा भरणाः स्त्रियः ।
धनञ्चादृष्टपर्यन्तं शिवपूजा विधेः फलम् ॥

ये वाञ्छन्ति महाभोगान् राज्यं वा त्रिदशालये ।
तेऽर्चयन्तु सदा कालं हरस्य चरणाम्बुजम् ॥

सौभाग्यकान्तिमद्रूपं सत्वं त्यागप्रभावतः ।
शौर्यं च जगतिख्यातिं शिवमर्चयतो भवेत् ॥

नारुद्रः संस्मरेद्रुद्रं नारुद्रो रुद्रमर्चयेत् ।
नारुद्रः कीर्तयेद्रुद्रं नारुद्रो रुद्रमाप्नुयात् ॥

शिवधर्मस्य सारोऽयं शिवे भक्तिः सुनिश्चला ।
सा चाष्टांगी शिवेनोक्ता कार्या नित्यं प्रयत्नतः ॥

श्रीभगवानुवाच

मद्भक्तजनवात्सल्यं पूजायाश्चानुमोदनम् ।
स्वयमभ्यर्चनं भक्त्या ममार्थेचांगचेष्टितम् ॥

मत्कथाश्रवणे भक्ति स्वरनेत्रांगविक्रिया ।
ममानुस्मरणं नित्यं यश्च मांनोपजीवति ॥

भक्तिरष्टविधाप्येषा यस्मिन् म्लेच्छेऽपि वर्तते ।
सविप्रेन्द्रो मुनिः श्रीमान् सयतिस्सचपण्डितः ॥

न मे प्रियश्चतुर्वेदी मद्भक्ताः खपचोऽपि यः।
तस्मै देयं ततो ग्राह्यं स च पूज्यो यथाह्यहम्॥

पत्रं पुष्पं फलं तोयं यो मे भक्त्या प्रयच्छति।

पू। ३(६)

तस्याहं न प्रणश्यामि स च मे न प्रणश्यति॥

अर्चयेतनरो नित्यं यो मां समयमास्थितः।
स मां पर्वतदुर्गेषु मार्गमाणो विनश्यति॥

यो मां सर्वगतं पश्येत् सर्वं च मयिसंस्थितम्।
तस्याहं नित्यमात्मस्थः स च नित्यं मयि स्थितः॥

सुदुर्लभा शिवे भक्तिर्दुर्लभं च शिवार्चनम्।
सुदुर्लभं शिवे दानं शिवहोमश्च दुर्लभः॥

सुदुर्लभं शिवज्ञानं तदभ्यासोऽति दुर्लभः।

सुदुर्लभतरं ज्ञेयं जपध्यानं शिवात्मकम् ॥

सुदुर्लभा तयोः प्राप्तिस्तदभ्यासोऽति दुर्लभः ।
सुदुर्लभमिदं ज्ञात्वा शिवे भक्तिं समाश्रयेत् ॥

लाभस्तेषां मनुष्याणां ये शिवं शरनं गताः ।
एषा दिवा च रात्रौ च नित्या शिवगतास्मृतिः ॥

नमस्कारादिसंयुक्तं शिव इत्यक्षरद्वयम् ।
जिह्वाग्रे वर्तते यस्य सफलां तस्य जीवितम् ॥

इत्येष वः समासेन शिवधर्मोऽखिलः क्रमात् ।
निर्दिष्टः प्रथमाध्याये शेषस्यैव प्रविस्तरः ॥

य इमं पठते नित्यं शृणुयाद्वापि भक्तितः ।
विमुक्तः सर्वपापेभ्यः शिवलोके महीयते ॥

डाकिन्यो विविधाकारा रक्षांसि प्रेतनायकाः ।

न तस्य पीडां कुर्वन्ति तथा चान्येऽपि हिंसकाः ॥

शत्रवो नाशमायान्ति सर्वरोगैर्न बाध्यते ।
सर्वरोगैर्न बाध्येत आपदो न स्पृशन्तितम् ॥

धनमायुर्यशो विद्यां प्रभावमतुलं व्रजेत् । (ल)
शुभान्युपचयं यान्ति नित्यं पूर्णगुणान्विताः ॥

इति श्रीशिवधर्मशास्त्रे भक्तिलक्षणं नाम प्रथमोध्यायः ॥

द्वितीयोऽध्यायः

सनत्कुमार उवाच

लिङ्गार्चनविधिं पूर्णं श्रोतुमिच्छामि तत्वतः ।
त्वत्प्रसादाद्विशेषेण भगवन्नन्दिकेश्वर ॥

यत्पुण्यं स्थापिते लिङ्गे कृते यच्च शिवालये ।

संमार्जने च यत्पुण्यं यत्पुण्यमुपलेपने ॥

प्। ४(७)

नीराज्जनौषधीबीजस्नानमङ्गलवादने ।
यत्पुण्यमर्च्चयदानेन तोयस्नानेन यद्भवेत् ॥

पञ्चगव्यपयस्नाने दधिस्नाने च यत्फलम् ।
घृतस्नानेन यत्पुण्यं घृताभ्यंगेन यद्भवेत् ॥

मधुस्नानेन यत्पुण्यं पुण्यमिक्षुरसेन च ।
उद्वर्तनान्तरस्नाने कुशपुष्पोदकेन च ॥

सौवर्णरत्नतोयैश्च गन्धचन्दनवारिभिः ।
कर्पूरागरुतोयेन शुद्धतोयेन यद्भवेत् ॥

विलेपनैश्च गन्धाद्यैर्विलिप्तेन च यद्भवेत् ।
तालवृन्तप्रदानेन प्रदाने चामरस्य च ॥

मुक्तापुष्पार्चनैश्चैव मालाभिर्लिङ्गपूरणे ।
पुष्पमण्टपिकायाश्च पुष्पमालावलम्बने ॥

पूजाभक्तिविशेषैश्च वेद्यामालावलम्बने ।
पुष्पजातिविशेषेषु धूपेष्वपि च यत्फलम् ।

ग्रामखेटपुराणां च देशदानेन यत्फलम् ।
तत्पालनापहारेण पुण्यापुण्यं च यद्भवेत् ॥

यतीनामन्नपानादिमात्रोपकरणानि च ।
दत्वा किं लभते पुण्यं कृत्वा वा तत्प्रतिश्रयम् ॥

तत्संस्कारे तथा तेषां प्रत्युत्थानाभिवादने ।
तत्संस्कारे तथा तेषां प्रत्युत्यानाभिवादने ॥

यदप्यन्यद्भवेत् सूक्ष्ममज्ञानान्नप्रचोदितम् ।
तत्सर्वं कथयास्माकं भक्तानामनुकम्पया ॥

इति श्रीशिवधर्मशास्त्रे द्वितीयोऽध्यायः ॥

तृतीयोध्यायः

नन्दिकेश्वर उवाच

त्वमतीवशिवे भक्तः पद्मयोनिसुतोत्तम ।
तेजते निखिलं वक्ष्ये शृणुष्वैकाग्रमानसः ॥

पूर्वमेकार्णवे घोरे नष्टे स्थावरजंगमे ।
विवादः सुमहानासीद्ब्रह्मविष्णवोः परस्परम् ॥

अहं कर्तास्म्यहं कर्ता न मत्तोऽन्यो जगत्प्रभुः ।
एवमाहहरिं ब्रह्मा ब्रह्माणं च हरिस्तथा ॥

तयोर्दर्पापहारार्थं प्रबोधार्थं च देवयोः ।
मध्ये समभवल्लिंगमैश्वरं तैजसं परम् ॥

ज्वालामालावृतं दिव्यं मप्रमेयमनौपमम्।

प्। ५८)

योजनायुतविस्तीर्णं स्थितं तद्विमलेऽम्भसि॥

ज्वालाभिर्मोहितौ तस्य लिंगस्य सुरसत्तमौ।
तदा विस्मयमापन्नौ पश्यन्तावमराधिपौ॥

गतावूर्ध्वमधस्तस्य संप्रधार्य परस्परम्।
अधोपलब्धये विष्णु रगादूर्ध्वं पितामहः॥

अदृष्ट्वा तमधश्चोर्ध्वं तौसमेत्य परस्परम्।
कृतांजलिपुटौ भूत्वा लिङ्गं तुष्टावतुस्तदा॥

अनादे देवदेवेश विद्येश्वर महेश्वर।
सर्वज्ञ ज्ञानविज्ञान प्रदानैक नमोऽस्तु ते॥

बहुरूपमहारूप सर्वरूपोत्तमोत्तम।

पशुपाशार्णवातीत वरप्रद नमोऽस्तु ते ॥

स्वभावनिर्मला भोग सर्वव्यापिन् महेश्वर ।
योग योगिन् महायोगिन् योगेश्वर नमोऽस्तु ते ॥

निरञ्जन निराधार स्वाधार निरूपप्लव ।
प्रसन्नपरमेशाय योगेश्वर नमोऽस्तु ते ॥

जिह्वाचापलभावेन मोहितौ नौक्वते स्तुतौ ।
तत्क्षन्तव्यः नौपम्यकस्ते स्तौति गुणार्णवम् ॥

लिङ्गोत्पत्तिस्तवं पुण्यं यः शृणोति सदानरः ।
सर्वपापविनिर्मुक्तः शिवलोके महीयते ॥

लिङ्गमध्ये परं लिङ्गं स्थितं प्रादेशसंमितम् ।
समाधिस्तोत्रसम्पन्नौ दृष्टवन्तौ शिवात्मकम् ॥

नैवतत्काञ्चनं रौप्यं ताम्रं स्फाटिकमौक्तिकम् ।

लक्षमात्रं स्थितं शान्तं केवलं तच्छिवात्मकम् ॥

तयोस्तुष्टो महादेवः प्रादाद्वरमनुत्तमम् ।
कारणत्वमनुज्ञाप्य तत्रैवान्तरधीयत ॥

प्राञ्जलिः प्रणतो विष्णुः ब्रह्मापि ब्रह्मतत्परः ।
पूर्वं लिङ्गं समभ्यर्च्य त्वत्तत्कार्याणि चक्रतुः ॥

ब्रह्मा ब्रह्माक्षैरैर्दिव्यैर्लिङ्गं पूजयते सदा ।
गन्धपुष्पादिभिर्नित्यं विष्णुः पूजयते शिवम् ॥

ततः प्रभृति ब्रह्माद्याः प्रतिष्ठाप्यसुरासुराः ।
तल्लिङ्गानुकृतिं लिङ्गं पूजयनृषयस्तदा ॥

परं गरुडं शरीरं च लिङ्गं क्षेत्रमनादिवत् ।
यदाद्यमैश्वरं तेजस्तल्लिङ्गं पञ्चसंज्ञितम् ॥

कल्पान्ते तस्य लिङ्गस्य दीयन्ते सर्वदेवताः।
दक्षिणे लीयते ब्रह्मा वायतश्च जनार्दनः॥

हृदये चैव गायत्री सर्ववेदोत्तमोत्तमा।
मूर्ध्निलीयन्ति वै वेदाः सषडङ्गपदक्रमाः॥

जठरे लीयते सर्वं जगत्स्थावरजङ्गमम्।
उत्पाद्यते पुनस्तस्मात् ब्रह्माद्यं सचराचरम्॥

आकाशं लिङ्गमित्याहुः पृथिवी तस्य पीठिका।
आलयः सर्वभूतानां लयनाल्लिङ्गमुच्यते॥

लिङ्गमित्थं प्रतिष्ठाप्य सर्वदेवभवोद्भवम्।
स्थापितं तेन सर्वं स्यात् पूजितञ्च न संशयः॥

प्राञ्जलिः प्रहितो विष्णु ब्रह्मापि ब्रह्मतत्परः।
ब्रह्मा पूजयते नित्यं लिङ्गं शैलमयं शुभम्॥

तस्य संपूजनात्तेन प्राप्तं ब्रह्मत्वमुत्तमम्।
शक्रोऽपि देवराजेन्द्रो लिङ्गं मणिमयं शुभम्॥

नित्यमर्चयते भक्त्या तेन शक्रत्वमाप्तवान्।
लिङ्गं हेममयं कान्तं धनदोऽर्चयते सदा॥

तेनासौ धनदो देवो धनदत्वमाप्तवान्।
विश्वेदेवा महात्मानो रौप्यलिङ्गं मनोहरम्॥

यजन्ते विधिवद्भक्त्या तेन विश्वत्वमवाप्नुवन्।
वायुः पूजयते नित्यं लिङ्गं पित्तलसंभवम्॥

वायुत्वं तेनसंप्राप्तमनौपम्य गुणावहम्।
इन्द्रनीलमयं लिङ्गं विष्णुरर्चयते सदा॥

विष्णुत्वं प्राप्तवांस्तेनाद्भुतैकं सनातनम्।
वसवः का* तं लिङ्गं पूजयन्ति विधानतः॥

महात्मानो वसुत्वं हि * * * * महोदयम्।
अश्विनौपार्थिवं लिङ्गं यजन्ते तु विधानतः॥

तेन तावपि नौ देवौ दिव्यदेहगतावुभौ।
स्फाटिकं वृद्धिमल्लिङ्गं वरुणोर्चयते सदा॥

वरुणत्वं हि संप्राप्तं तेन ऋध्या समन्वितम्।
लिङ्गमन्नमयं पुण्यमग्निर्यजति भावितः॥

अग्नि त्वं प्राप्तवांस्तेन तेजोरूपसमन्वितम्।
ताम्रं लिङ्गं सदा कालं भक्त्या देवो दिवाकरः॥

पू। ७(१०)

अर्च्यतेन सदाकालं प्राप्तं सूर्यत्वमुत्तमम्।
मुक्ताफलमयं लिङ्गं सोमः पूजयते सदा॥

तेन सोऽपि संप्राप्तः सोमत्वं सततोज्ज्वलम्।
प्रकलकमयं लिङ्गं यजंते पन्नगोत्तमाः॥

तेन नागाः सुभोगाढ्याः प्रयास्यन्ते परं पदम्।
कृष्णायसमयं लिङ्गं पूजयन्त्यसुरोत्तमाः॥

राक्षसाश्च महात्मानः तेनतेऽमितविक्रमाः।
त्रपुसीसमयं लिङ्गं पिशाचाः पूजयन्ति ते॥

तेन ऋद्धिबलोपेताः प्रयान्ति परमं पदम्।
त्रैलोहिकं सदालिङ्गं यजन्ते गुह्यकादयः॥

तेन भोगफलोपेताः प्रयान्तीश्वरमन्दिरम्।
वज्रलोहमयं लिङ्गं यजन्ते मातरस्सदा॥

मातृत्वं प्राप्यताः सर्वाः प्रयान्ति परमं पदम्।
एवं देवाः सगन्धर्वाः सयक्षोरगराक्षसाः॥

पूजयन्ति सदाकालमीशानं सुरनायकम्।
तेन पूजयते नित्यं सर्वं लिङ्गे प्रतिष्ठितम्॥

तस्मात् सदार्चयेल्लिङ्गं यदीच्छे च्छ्रेय आत्मनः।
लिङ्गो देवो महादेवः साक्षादेव व्यवस्थितः॥

अनुग्रहाय लोकानां तस्माल्लिङ्गं प्रपूजयेत्।
यो न पूजयते मोहाल्लिङ्गं त्रिभुवनेश्वरम्॥

न च स्वर्गस्य मोक्षस्य न च राज्यस्य भाजनम्।
यस्तु पूजयते नित्यं लिङ्गं त्रिभुवनेश्वरम्॥

स स्वर्गमोक्षराज्यस्य क्षिप्रं भवति भाजनम्।
तस्मादेकमनाभूत्वा यावज्जीवं प्रतिज्ञया॥

अर्चयन्ति महादेवमापन्नोऽपि सदाबुधाः।
वरं प्राणपरित्यागः शिरसो वा परिच्छदे॥

नत्वै वा पूज्यभुञ्जीयात् भगवन्तं त्रिलोचनम्।
एवं निर्वहते यस्तु यावज्जीवं शिवार्चनम्॥

आयुष्यं बलमारोग्यं स रुद्रो नात्रसंशयः।

न हि लिङ्गार्चनादन्यत् पुण्यमभ्यधिकं क्वचित्॥

इति विज्ञाय यत्नेन पूजनीयः सदाशिवः।

यो लिङ्गद्वेष्टिसंमोहात् सर्वदेवनमस्कृतम्॥

नरोनरकगामी स्यात् तस्य संभाषणादपि।

पू। ८(११)

लिङ्गमित्थं प्रतिष्ठाप्य सर्वयत्नैर्विधानतः॥

यत्पुण्यफलमाप्नोति तदेकाग्रमनाः शृणु।

सर्वयज्ञतपोदान तीर्थवेदेषु यत्फलम्॥

तत्फलं कोटिगुणितं स्थाप्यलिङ्गं लभेन्नरः।

यो लिङ्गं स्थापयेदेकं विधिपूर्वं सदक्षिणम्॥

सर्वकामोदितं पुण्यं कोटि कोटि गुणं लभेत् ।
मातृतः पितृतश्चैव यस्य चोद्वहते स्त्रियः ॥

कुलैकविंशमुत्तार्य शिवलोके महीयते ।
भुक्त्वा तु विपुलान् भोगान् प्रलयेसमुपस्थिते ॥

ज्ञानयोगं समासाद्य स तत्रैव विमुच्यते ।
अथ चेद्राज्यमाकांक्षेज्जायते स भवान्तरे ॥

सप्तद्वीपसमुद्रायाः क्षितेरधिपतिर्भवेत् ।
यः कृत्वा पार्थिवं लिङ्गमर्चयेत् स वैदिकम् ॥

इहैव धनवान् छ्रीमान्नन्ते रुद्रश्च जायते ।
सन्ध्यायां योर्चयेल्लिङ्गं कृत्वा बिम्बेन पार्थिवम् ॥

दशैकादशिकं यावत् तस्य पुण्यफलं शृणु ।
अनेनैव तु देहेन रुद्रः संचरतेक्षितौ ॥

पापहा सर्वमर्त्यानां दर्शनस्पर्शनादपि ।
उद्धृत्यादिविसंस्थाप्य कुलानामेकविंशतिः ॥

सहायैः सहितो नित्यं मोदतेदिविरुद्रवत् ।
यः श्रीवृक्षमयं लिङ्गं सर्वगन्धोपशोभितम् ॥

कुसुमैश्च सुगन्धैश्च फलैश्च विविधैस्तथा ।
भक्ष्यभोज्यान्नपानैश्च घृतदीपसमायुतम् ।
तस्य दक्षिणपार्श्वे तु विन्यसेदगरुं बुधः ॥

दद्यात् पश्चिमभागे तु शोभनां तु मनाश्शीलाम् ।
उत्तरे चन्दनं दद्यात् हरितालं तु पूर्वतः ॥

एवं वित्तानुसारेण कृत्वा विभवविस्तरम् ।
कृष्णपक्षे चतुर्दश्यां शिवाय विनिवेदयेत् ॥

सकृदप्येव यः कश्चिल्लिङ्गं कुर्याद्द्विजोत्तमः ।
यत्फलं लभते तस्य तन्मे निगदतः शृणु ॥

सर्वपापविनिर्मुक्तः सर्वोपद्रववर्जितः।

निष्कलः सर्वगोभूत्वा प्रविशेच्छिवमव्ययम्॥

पांसुना क्रीडमानोऽपि लिङ्गं कुर्यात्तु यो नरः।

प्र। ९१२)

प्रत्यान्ते लभते राज्यमसपत्नमकण्टकम्।

सूक्ष्मेणापि प्रयोगेणामेयं पुण्यसञ्चयम्॥

शिवमर्चयतो यस्मात् तस्मान्नित्यं समर्चयेत्।

तस्मात्सर्वप्रयत्नेन शृणुयाद्भावितात्मनः॥

पापकञ्चुकमुत्सृज्य प्राप्नोति परमं पदम्॥

इति श्रीशिवधर्मशास्त्रे नन्दिप्रोक्ते लिङ्गोत्पत्तिर्नामतृतीयोध्यायः॥

अथ चतुर्थोऽध्यायः

नन्दिकेश्वर उवाच

शिवभक्ता महोत्साहाः शिवार्चनपरायणाः।
सर्वलक्षणसम्पन्नाः सर्वार्थान् साधयन्ति ते॥

सर्वद्वन्द्व सहाधीराः नित्यमुद्युक्त चेतसः।
परोपकार निरताः गुरुशुश्रूषणे रताः॥

आर्जवामार्दवाः स्वच्छा अनुकूलाः प्रियंवदाः।
अमानिनो बुद्धिमन्तस्त्यक्त स्पर्धागतस्पृहाः॥

शान्ताः स्मितमुखाः भद्रा नित्यं स्वागतवादिनः।
अल्पवाचोऽल्पवक्तारः शूरास्त्यागविशारदाः॥

शौचाचारेण सम्पन्ना दया दाक्षिण्यगोचराः।
डम्भमात्सर्यनिर्मुक्ताः याथा तथ्यविभाषिणः॥

संविभागपराः प्राज्ञाः अशठाश्चाप्यकुत्सिताः।
विषयेष्ववनिर्लेपाः पद्मपत्रमिवांभसः॥

नदीनानापिमलिना न च रोषवशानगाः।
भवन्ति भावितात्मानः सुस्निग्धाः साधुसेविताः॥

न पाणिपादवाक्चक्षुः श्रोत्रशीर्षोदरैर्बुधाः।
चापलानि न कुर्वन्ति सर्वसंगविवर्जिताः॥

रुद्रात्मानो रुद्रपराः रुद्रांशा रुद्रभाषिताः।
इत्याचारसमायुक्ता भवन्तिभुविमानवाः॥

एकान्तं भक्तिमास्थाय परापरविभूतये।
पूजनीयः शिवो नित्यं गुणेष्वेतेषु वर्तता॥

सर्वेषामेव पात्राणामतिपात्रं महेश्वरः।
पतनात् त्रायते यस्मात् दतीवनरकार्णवे॥

किञ्चिद्वेदमयं पात्रं किञ्चित्पात्रं तपोमयम्।
आगमिष्यति यत्पात्रं तत्पात्रं तारयिष्यति॥

तस्य पात्रस्य महात्म्याद्दानमण्वापि चाक्षयम्।
तस्मात्तस्मै सदा देयमप्रमेयफलार्थिभैः॥

शिवेदत्तं हुतं जप्तं पूजाबलि निवेदनम्।
एकान्तात्यन्तफलदं तद्भवेन्नात्र संशयः॥

प्र। १०(१३)

एकान्तात्यन्तफलदं तद्भवेन्नात्रसंशयः।
भक्त्या वित्तानुसारेण कुर्यात्प्रासादसञ्चयम्॥

अल्पे महति वा पुण्यं फलमाढ्यदरिद्रयोः॥

वित्तशाठ्येन यत्कुर्यात् फलमाढ्योऽपि यो नरः।
तत्तत्फलमवाप्नोति प्रलोभाक्रान्तमानसः॥

तस्मात्त्रिभागं वित्तस्य जीवनायप्रकल्पयेत्।
भागद्वयं च धर्मार्थे अनित्यं जीवितं यतः॥

भक्त्या प्रचोदितः कुर्यात् अल्पवित्तोऽपि यो नरः।
महाविभवसारोऽपि न कुर्याद्भक्तिवर्जितः॥

सर्वस्वमपि यो दद्यात् शिवे भक्तिविवर्जितः।
न तेन धर्मभागीस्यात् भक्तिरेवात्र कारणम्॥

न तत्तपोभिरत्युग्रैर्न च सर्वैर्सहामखैः।
गच्छेच्छिवपुरं दिव्यं मुक्त्वाभक्तिं शिवात्मिकाम्।
मृदादीष्टकशैलं वा यः कुर्यात्तु शिवालये॥

त्रिसप्तकुलसंयुक्तः शिवलोके महीयते॥

मृण्मयात् कोटिगुणितं पुण्यं स्याद्दारुभिः कृतैः।
कोटि कोटिगुणं पुण्यं मृत्काष्ठादिष्टकामये॥

द्विगुणं द्विगुणं पुण्यं शैलजे स्याच्छिवालये ।
मृच्छैलयोः समं ज्ञेयं पुण्यमाढ्यदरिद्रयोः ॥

तत्र तत्र गतः कुर्याः पुण्यं शैलेष्टकामयम् ।
नवं पुराणरहितं तस्यां कुर्याच्छिवालयम् ॥

अष्टेष्टकसमायुक्तं यः करोति शिवालयम् ।
विधूतपापसंघातः सोऽपि गच्छेच्छिवालयम् ॥

क्रीडमानोऽपि यः कुर्यात् बालभावाच्छिवालयम् ।
रुद्रलोके भवेत् सोऽपि विमानं सर्वगामिकम् ॥

दिव्यमालापरिक्षिप्तं दिव्यगन्धर्वशोभितम् ।
डोलाविक्षेपसंयुक्तं घण्टाचामरभूषितम् ॥

मुक्तादामवितानेन शोभितं सूयसप्रभम् ।
अप्सरोगणसङ्कीर्णं सर्वकामसुखप्रदम् ॥

तत्रोषित्वा महाभोगै वर्षकोट्ययुतं सुखी ।
क्रमादागत्यलोकेऽस्मिन् राजा भवति धार्मिकः ॥

पश्यन् परिहरन् जन्तून् मार्जन्यामृदुसूक्ष्मया ।
शनैः संमार्जनं कुर्याच्चान्द्रायणफलं लभेत् ॥

प्। ११(१४) नाहारवशजीर्णाया वन्ध्यायाः क्षीरवत्सजम् ।
रोगार्तनवसूताया गोभ्यो गोमयमाहरेत् ॥

स्वसंस्थं गोमयं गृह्य स्थाने वा पतितं शुभे ।
उपर्युपरिसन्त्यज्य प्रत्यग्रं जन्तु वर्जितम् ॥

वस्त्रपूतेन तोयेन यः कुर्यादुपलेपनम् ।
पश्यन् परिहरन् जन्तून् चान्द्रायणफलं लभेत् ॥

यः कुर्यात्सर्वकार्याणि वस्त्र पूतेन वारिणा ।
स मुनिः समहासाधुः स योगी सशिवं व्रजेत् ॥

क्षरन्ति सर्वदानानि यज्ञहोमबलिक्रियाः ।
न क्षरेतमहादानमभयं सर्वदेहिनाम् ॥

नैरन्तर्येण यः कुर्यात्पक्षं संमाजनार्चनम् ।
युगकोटिशतं साग्रं रुद्रलोके महीयते ॥

तस्यान्ते स चतुर्वेदः सुरूपः प्रियदर्शनः ।
आढ्यः सर्वगणोपेतो राजा भवतिधार्मिकः ॥

सम्पर्केणापि यः कुर्यात् नरः कर्मशिवालये ।
सोऽपि देहत्रयात् ज्ञानं प्राप्यशान्तिमवाप्नुयात् ॥

रुद्रदेवनिकायेषु कश्चिज्ज्ञानमवाप्नुयात् ।
कश्चिदेव तु मेदिन्यां लब्ध्वा ज्ञानं विमुच्यते ॥

तावद्भ्रमति संसारे दुःखशोकपरिप्लुतः ।
न भवन्ति शिवेभक्ता यावत् सर्वेऽपि देहिनः ॥

समासक्तं यथा चित्तं जन्तोर्विषयगोचरे ।
यदिनामशिवोऽप्येवं को न मुच्येत बन्धनात् ॥

यः कुर्यात् कुट्टिमाभूमिं दर्पणोदर सन्निभाम् ।
नानावर्णविचित्रां वा विचित्रकुसुमोज्ज्वलाम् ॥

क्वचित्कलशविन्यस्तां पङ्कजाद्युपशोभिताम् ।
मनोभिरम्यां सुस्निग्धां शिवयतनसंसदि ॥

यावद्धस्ता भवेद्भूमिः समन्तादुपशोभिता ।
तावद्युगसहस्राणि शिवलोके महीयते ॥

सुधाप्रलिप्तं यः कुर्यात् सर्वयत्नैः शिवालयम् ।
तावत्पुण्यं लभेत्सोऽपि यावदायतने कृते ॥

प्रत्यब्दं यः प्रकुर्वीत शंभोरायतनं बुधः ।
धवलं क्षीरसुधया यथाशोभं च वर्णकैः ॥

यावन्त्यब्दानि कुरुते धवलं तच्छिवालयम्।

प्। १२(१५)

तावद्युगसहस्राणि शिवलोके महीयते॥

कारयेच्चित्रशास्त्रज्ञैर्यत्नाच्चित्रं शिवालये।
रुद्रावतारक्रीडादिप्रयोगैरागमोदितैः॥

तावत्तद्रूपरूपाणि सुरूपाणि तु लेखयेत्।
तावद्युगसहस्राणि रुद्रलोके महीयते।
खण्डस्फुटितसंस्कारं यः प्रकुर्याच्छिवालयम्॥

आरामावसयाभ्यां च लभते मौलिकं फलम्।
नास्तिरुद्रसमो देवो नास्ति रुद्रसमोगुरुः॥

नास्तिरुद्रसमं ज्ञानं नास्तिरुद्रसमं तपः।
निर्धूतमलपंकाय स्वभावामलमूर्तये॥

सितभस्मांगदेहाय देवेशाय नमोस्तु ते ।
नीलकण्ठाय शर्वाया जाया व्यक्तमूर्तये ॥

बहुरूपाय कान्ताय शाश्वताय नमोस्तु ते ।
पराय परमेशाय सप्तांगायमहात्मने ॥

अतीतगुणसंघाय विश्वेशाय नमोस्तु ते ।
महाभोगीन्द्रहाराय पिङ्गलोचनचारवे ॥

विचित्र चरिताढ्याय अनन्ताय नमोस्तु ते ।
सर्वप्रणतदेहाय स्वयमप्रणतात्मने ।

पूज्यानामपि पूज्याय नमस्त्र्यक्षाय शूलिने ॥

ब्रह्मेन्द्रविष्णुवन्द्यायोत्पत्तिस्थिति हेतवे ।
भुक्तिमुक्ति प्रदानाय संस्कृताय नमोस्तु ते ॥

वामाय वामरूपाय वामाचाराय भामिने ।

वामकान्ताय वामायेशानाय नमोऽस्तु ते ॥

य इदं कीर्तयेत्पुण्यं प्रासादाध्यायमुत्तमम् ।
सर्वदोषविनिर्मुक्तो गाणापत्यमवाप्नुयात् ॥

इति श्रीशिवधर्मशास्त्रे प्रासादाध्यायश्चतुर्थः ॥

अथ पञ्चमः

नन्दिकेश्वर उवाच

लिङ्गमूर्तेर्महेशस्य शिवस्य परमेष्ठिनः ।
स्नानकाले प्रकुर्वीत जयशब्दादिमङ्गलम् ॥

त्रिशूलशंखवज्राब्ज श्रीवत्सस्वस्तिकादिभिः ।
हैमरौप्यादिपात्रस्थैः कल्पितैर्गोमयादिभिः ॥

नानावर्णकसंयुक्तैरक्षतैस्तिलतण्डुलैः ।

सिद्धार्थैर्दधिसंमिश्रैर्यथा शोभं प्रकल्पयेत्॥

दूर्वापद्मप्रदीपाद्यैश्चूताश्वत्यादिपल्लवैः।
ओषधीभिश्च मेध्याभिः सर्वबीजैर्यवांकुरैः॥

अष्टम्यादिषु सर्वेषु दिवसेषूत्सवेषु च॥

पर्वकालेषु पुण्येषु पुष्यपौर्णिमपर्वणि।
शंखभेर्यादिनिर्घोषैर्महद्भिर्गेयसंयुतैः॥

कुर्यान्नीराजनं लिङ्गैः शिवमुद्दिश्यमङ्गलैः।
यावत्पर्वाणि कुरुते भक्त्यानीराजनं शिवे॥

तावद्वर्षसहस्राणि रुद्रलोके महीयते।
स्नानकाले त्रिसंध्यं च यः कुर्याद्गेयवादितम्॥

नृत्तं वा मुखवाद्यं वा तस्य पुण्यफलं शृणु ।
यावन्त्यहानिकुरुते गेयं नृत्तादि वा शतम् ॥

तावद्युगसहस्राणि रुद्रलोके महीयते ।
कपिला पञ्चगव्येन कुशवारियुतेन तु ॥

स्नापयेन्मन्त्रपूतेन ब्रह्मस्नानं हि तत् स्मृतम् ।
एकाहमपि यो लिङ्गे ब्रह्मस्नानं समर्चयेत् (समाचरेत्) ॥

स विधूयाशुपापानि रुद्रलोके महीयते ।
कपिलापञ्चगव्येन विधिनासकृदा चरेत् ॥

स्नानं शतगुणं ज्ञेयमितरस्मान्नसंशयः ।
देवाग्निकार्यमुद्दिश्य देहशुद्धिं च शाश्वतीम् ।
कपिलामाहरेत्तस्मान् मुनिदेवादिवन्दिताम् ॥

कपिलां यः पिबेच्छूद्रः शिवकार्यार्थनिर्मिताम् ।
सपच्येत महाघोरे सुचिरं नरकार्णवे ॥

वर्षकोटिसहस्राणि यत्पापं समुपार्जितम्।
कल्पकोटिसहस्रं तु यत्पापं समुपार्जितम्॥

घृतस्नानेन तत्सर्वं दहत्याग्निरिवेन्धनम्।
कृष्णाष्टम्यां घृतस्नानं कृत्वा लिङ्गे सकृन्नरः॥

कुलैकविंशमुद्धृत्य शिवलोके महीयते।
अयुतं योगवां दद्यात् दीग्ध्रीणां वेदपारगे॥

वस्त्रादिहेमयुक्तानां क्षीरस्नानस्य तत्फलम्।
सकृदाढकेन पयसा यो लिङ्गं स्नापयेन्नरः॥

राजतेन विमानेन सोमलोकं सगच्छति।
स्नाप्य दध्ना सकृल्लिङ्गं विष्णुलोके महीयते॥

मधुना स्नापयित्वा तु चन्द्रलोके महीयते।

स्नापयेत्तिलतैलेन हस्तयन्त्रोद्भवेन च।

श्वेतपीतकपिष्टैर्वा वायुलोके महीयते।
स्नानमिक्षुरसेनापि यो लिङ्गं सकृदाचरेत्॥

लभेद्वैद्याधरं लोकं सर्वकामसमन्वितम्।
फलोदकेन यो लिङ्गं सकृत्स्नापयते नरः॥

उत्सृज्य पापकलिलां पितृलोके महीयते।
सितेनभस्मनास्नाप्य सकृल्लिङ्गं प्रमोदते॥

चन्द्रांशुनिर्मलः श्रीमान् शिववत्सोममण्डले।
वस्त्रपूतेन तोयेन लिङ्गं स्नापयते सकृत्॥

स सर्वकामतृप्तात्मा वारुणं लोकमाप्नुयात्।
कुशोदकेन यो लिङ्गं भक्त्यास्नापयते सकृत्॥

काञ्चनेन विमानेन ब्रह्मलोकं सगच्छति ।
गन्धचन्दनतोयेन स्नापयेत्सकृदीश्वरम् ॥

गन्धर्वलोकमाप्नोति गन्धर्वैश्च सपूज्यते ।
पुष्पोदकेन सावित्रं कौबेरहेमवारिणा ॥

रत्नोदकेन चाप्यैन्द्रं लोकं प्राप्य समोदते ।
पाटलोत्पलपद्मानि करवीराणिसर्वदा ॥

स्नानकालेंबुयोज्यानि क्षीराणि सुरत्रीणि च ।
एषामेकतरस्नानं त्रिःकृत्वा भक्तितः शिवे ॥

विधूयपापकलिलं शिवलोके महीयते ।
कर्पूरागरुतोयेन यो लिङ्गं स्नापयेत्सकृत् ॥

सर्वपापविनिर्मुक्तः शिवलोके महीयते ।
मन्त्राष्टशतजप्तेन विमलेनांभसा शिवम् ॥

स्नापयित्वा सकृद्भक्त्या शिवलोके महियते ।
कुलैकविंशमुद्धृत्य शिवलोके महीयते ॥

पितॄनुद्दिश्य यो लिङ्गं स्नापयेच्छीतवारिणा ।
तृप्ताः स्वर्गं प्रयास्यन्ति पितरोनरकादपि ॥

लिङ्गं शीताम्बुना स्नाप्य धारोष्णपयसा ततः ।
स्नाप्य पश्चाद् घृतेनापि घृतमेव विशिष्यते ॥

एतत् स्नानत्रयं कृत्वा पूजयित्वा च भक्तितः ।
अश्वमेधसहस्रस्य फलमाप्नोति मानवः ॥

मृत्कुम्भात्ताम्रजैः कुम्भैः स्नानं शतगुणोत्तरम् ।

प्र । १५(१८)

रौप्ये लक्षान्तरं पुण्यं हेमेकोट्याधिकं फलम् ।
लिङ्गस्य दर्शनं पुण्यं दर्शनात् स्पर्शनं तथा ॥

स्पर्शनादर्चनं श्रेष्ठं घृतस्नानमतःपरम्।
इहामुत्रकृतं पापं घृतस्नानेन देहिनाम्॥

क्षपये च्छंकरो यस्मात् तस्मात् स्नानं समाचरेत्।
दशापराधांस्तोयेन क्षीरेण तु शतं क्षमेत्॥

सहस्रं क्षमते दध्ना घृतेनाप्ययुतं क्षमेत्।
नैरन्तर्येण यो मासं घृतस्नानं समाचरेत्॥

एकविंशत्कुलोपेतो वसेच्छिवपुरे सुखी।
स्नानं फलशतं ज्ञेयमभ्यङ्गः पञ्चविंशतिः॥

फलानान्ते सहस्रं तु महास्नानं प्रकीर्तितम्।
घृतस्नान घृताभ्यंगे कुर्याल्लिङ्गं विरूपणम्॥

यवगोधूमजैश्चूर्णैः क्षालयेद्गन्धयोजितैः।
सुखोष्णेनाम्भसा चापि स्नापयेदन्तरान्तरे॥

घर्षयेद्बिल्वपत्रैश्च तद्वत्पीठं च शोधयेत् ।
दशधेनु सहस्राणि यद्दत्वा लभते फलम् ॥

तत्फलं लभते सर्वं लिङ्गस्योद्वर्तने कृते ।
अर्घ्यं पुष्पफलोपेतं यः शिवाय निवेदयेत् ॥

दशवर्षसहस्राणि शिवलोके महीयते ।
आपः क्षीरं कुशाग्राणि घृतं दधिसतण्डुलम् ॥

तिलाः सिद्धार्थकाश्चैवमर्घ्यमष्टाङ्गमुच्यते ।
गन्धोदकेन संमिश्रं मुदकार्घ्याच्छतोत्तरम् ॥

पञ्चगव्यसमायुक्तमर्घ्यं शतगुणं भवेत् ।
योऽर्घ्यमष्टांगमापूर्य लिङ्गमूर्ध्निनिवेशयेत् ॥

दशवर्षसहस्राणि रुद्रलोके समोदते ।
यवतण्डुलसव्रीहिमाषैरक्षतमादिशेत् ॥

घृतं विनाक्षतं ग्राह्यमिति केचिद्व्यवस्थिताः।
दारवेणाघ्र्यपात्रेण दत्वाघ्र्यं यत्फलं भवेत्॥

तस्माद् दशगुणं पुण्यं मृत्पात्रेण प्रकीर्तितम्।
ताम्रपात्राघ्र्यदानेन पुण्यं शतगुणोत्तरम्॥

पलाशपद्मपत्राभ्यां ताम्रपात्रसमं भवेत्।
रौप्यपात्रेण विज्ञेयमघ्र्यं लक्षगुणोत्तरम्॥

सुवर्णपात्रविन्यस्तमघ्र्यं कोटिगुणोत्तरम्।

पू। १६(१९)

एवं स्नानाघ्र्यनैवेद्यं बलिपूजादिषु क्रमात्।
पात्रान्तरविशेषेण तत्फलं चोत्तरोत्तरम्॥

रौप्यपात्रप्रदानेन तस्माच्छतगुणं शिवे।
फल(शत)कोटिसुवर्णस्य यो दद्याद्वेदपारगे॥

शिवाय रौप्यं यो दद्यात् तस्य पुण्यं ततोऽधिकम्।
हेमपात्राणि यो भक्त्या शिवाय विनिवेदयेत्॥

न शक्यं तस्य तद्भक्तुं पुण्यानन्त्यं विशेषतः।
तुल्यं शिवे फलं प्रोक्तं दानादाढ्यदरिद्रयोः॥

तयोरप्यधिकं तस्य यः शिवे भावनाधिकः।
विभवेसति यो मोहात् न कुर्याद्विधिविस्तरम्॥

नैव तत्फलमाप्नोति प्रलोभाक्रान्तमानसः।
तस्मात् पत्रैः फलैपुष्पैस्तोयाद्यैश्चैव यत्कृतम्॥

तदनन्तफलं ज्ञेयं भक्तिरेवात्रकारणम्।
लिङ्गस्या लेपनं कृत्वा दिव्यगन्धैः सुगन्धिभिः॥

वर्षकोटिशतं दिव्यं रौद्रलोके महीयते।
गन्धानुलेपनात् पुण्यं द्विगुणं चन्दनस्य तु॥

चन्दनाच्चागरुज्ञेयं पुण्यमष्टगुणोत्तरम् ।
कृष्णागरोर्विशेषेण द्विगुणं फलमिष्यते ॥

तस्माच्छतगुणं पुण्यं कुंकुमस्य विधीयते ।
चन्दनागरुकर्पूरैरश्लक्षणपिष्टैः सकुङ्कुमैः ॥

लिङ्गं पर्याप्तमालिप्य कल्पकोटिं वसेद्दिवि ।
संवीज्यतालवृन्तेन लिङ्गं गन्धैः प्रलेपितम् ॥

दशवर्षसहस्राणि वायुलोके महीयते ।
भक्त्यानिवेद्यरुद्राय तालवृन्तं सुशोभनम् ॥

दशवर्षसहस्राणि रुद्रलोके महीयते ।
मायूरव्यजनं दत्वा शिवायातीवशोभनम् ।

वर्षकोटिशतं पुण्यं रुद्रलोके महीयते ।
शिवायचामरं दत्वा मण्डीमण्डविभूषितम् ॥

हेमरूप्यादिदण्डं वा तस्य पुण्यफलं शृणु ।

चामरासक्तहस्ताग्र दिव्यस्त्रीपरिवारितः ॥

महाभोगविमानस्थश्चिरं शिवपुरे वसेत् ।

इत्यर्चना प्रचारेणानन्तं पुण्यसञ्चयम् ॥

सनत्कुमारः

पुऽपैः कतिविधैः पूजा कर्तव्या कथयस्व मे ।

पू । १७(२०)

श्रीनन्दिकेश्वर उवाच

पुष्पैरारण्यसंभूतैः पत्रैर्वा गिरिसंभवैः ॥

अपर्युषितनिश्छिद्रैः प्रोक्षितैर्जन्तुवर्जितैः ।

आत्मारामोद्भवैश्चापि पुष्पैः संपूजयेच्छिवम् ॥

पुष्पजातिविशेषेण भवेत्पुण्यं विशेषतः।
तपश्शीलगुणोपेते पात्रे वेदस्य पारगे॥

दशदत्वा सुवर्णानि यत्फलं कुसुमेष्ट तत्।
अर्कपुष्पेपिचैकस्मिन् शिवाय विनिवेदिते॥

दश दत्वा सुवर्णानि यत्फलं तदवाप्नुयात्।
एवं पुष्पविशेषेण फलं तदधिकं भवेत्॥

एवं पुष्पान्तरे ज्ञेयं फलं स्यात् तन्निबोधत।
अर्कपुष्पसहस्त्रेभ्यः करवीरं विशिष्यते।

बिल्वपत्रसहस्त्रेभ्यः पद्ममेकं विशिष्यते।
पद्मपुष्पसहस्त्रेभ्यो बकपुष्पं विशिष्यते॥

बकपुष्पसहस्त्रेभ्यो ह्येकं धुत्तूरकं वरम्।
धत्तूरकसहस्त्रेभ्यो बृहत्पुष्पं विशिष्यते॥

बृहत्पुष्पसहस्रेभ्यो द्रोणपुष्पं विशिष्यते ।
द्रोणपुष्पसहस्रेभ्यो ह्यपामार्गं विशिष्यते ॥

अपामार्गसहस्रेभ्यः कुशपुष्पं विशिष्यते ।
कुशपुष्पसहस्रेभ्यः शमीपुष्पं विशिष्यते ॥

शमीपुष्पसहस्रेभ्यो श्रीमन्नीलोत्पलं वरम् ।
सर्वेषामेव पुष्पाणां प्रवरं नीलमुत्पलम् ॥

नीलोत्पलसहस्रेण यो मालां संप्रयच्छति ।
शिवाय विधिवद्भक्त्या तस्य पुण्यफलं शृणु ॥

कल्पकोटिसहस्राणि कल्पकोटिशतानि च ।
वसेच्छिवपुरे श्रीमान् शिवतुल्यपराक्रमः ।

शेषाणां पुष्पजातीनां यत्फलं परिकीर्तितम् ।
तत्फलस्यानुरूपेण शिवलोके महीयते ॥

शमीपुष्पं बृहत्याश्च कुसुमं तुल्यमुच्यते।
करवीरसमाज्ञेया जातीविजयपाटला॥

श्वेतमन्दारकुसुमं करञ्जेन्द्रतरुद्भवम्।
वैभीतकानिपुष्पाणि तत्पत्राणि च वर्जयेत्॥

दुर्गन्धान्युग्रगन्धीनि कुसुमानि विवर्जयेत्।

प्। १८(२१)

गन्धवन्त्यपवित्राणि यानि कान्यपि वर्जयेत्॥

गन्धहीनमपिग्राह्यं पवित्रं यत्कुशादिकम्।
सात्विकं तद्धिकुसुमं पवित्रं नामतत्समम्॥

कनकादीनि शस्तानि रात्रौ देयानिशङ्करे।
दिवाशेषाणि पुष्पाणि दिवात्रान्तुमल्लिका॥

प्रहरन्तिषु ते जाति करवीरमहर्निशम्।

केशकीटोपबद्धानि शीर्णपर्युषितानि च ॥

स्वयं पठितपुष्पाणि त्यजेदुपहतानि च ।
मुकुलैर्नार्चयेद्देवं पक्वान्नं न निवेदयेत् ॥

फलं क्वचितविद्धं च यत्नात् पक्वं परित्यजेत् ।
अलाभेन तु पुष्पाणां पत्राण्यापि निवेदयेत् ॥

पत्राणामप्यलाभेन फलान्यपि निवेदयेत् ।
पलानामप्यलाभेन तृणगुल्मोषधीरपि ॥

ओषधीनामप्यलाभेन भक्त्याभवतिपूजितः ।
प्रत्येकमुक्तपुष्पेषु दशसौवर्णिकं फलम् ॥

स्रङ्निबद्धेषु तेष्वेव द्विगुणं फलमुच्यते ।
सुगन्धैर्मुक्तपुष्पैश्च यो लिङ्गं संप्रपूजयेत् ॥

मालाभिर्वापि सुघनैस्सोऽनन्तं फलमाप्नुयात् ।

बिल्वपत्रैरखण्डैर्यः सकृल्लिङ्गं प्रपूजयेत् ॥

सर्वपापविनिर्मुक्तः शिवलोके महीयते ।
धुर्त्तूरकैश्च यो लिङ्गं सकृत्पूजयते नरः ॥

स गोलक्षप्रदानस्य (शिवं प्राप्य) फलं प्राप्य शिवं व्रजेत् ।
बृहती कुसुमैर्भक्त्या यो लिङ्गं सकृदर्चयेत् ॥

गवामयुतदानस्य फलं प्राप्य शिवं व्रजेत् ।
मल्लिकोत्पलपद्मानि जातीपुन्नागचम्पकाः ॥

अशोकश्वेतमन्दार कर्णिकारबकानि च ।
करवीरार्कमन्दारशमीतगरुकेसराः ॥

कुशापामार्गकुमुदकदम्बद्रोणजा अपि ।
सौगन्धिकासनानांगबिन्दुशैवलिकार्जुनाः ॥

तुलसी कुरवकोलनागवञ्जुलसंभवाः ।

नन्द्यावर्ताश्च शाम्याक तिलकं नवमालिका ॥

तरुपुन्नागदन्ती च मालती कुटजादयः ।
पुष्पैरेतैर्यथा लब्धैर्योनरः पूजयेच्छिवम् ॥

स यत् फलमवाप्नोति तदेकाग्रमनाः शृणु ।

प्। १९(२२)

सूर्यकोटिप्रतीकाशैर्विमानैस्सार्वगामिकैः ।
पुष्पमालापरिक्षिप्तैर्गीतवादित्रनादितैः ॥

तन्त्रीमधुरवाद्यैश्च स्वच्छन्दगमनालसैः ।
रुद्रकोट्यासमाकीर्णैर्देवदानवदुर्लभैः ॥

दोधूयमानश्चामरैस्तु स्तूपमानः सुरासुरैः ।
गच्छेच्छिवपुरं दिव्यं यत्र वा रुचितं भवेत् ॥

एतैर्वा पीहकुसुमैः जलस्थलरुहैः शिवम् ।

संपूज्यप्रोक्षितैर्भक्त्या शिवलोके महीयते ॥

शिवस्योपरियः कुर्यात् सुघनं पुष्पमण्टपम् ।
शोभितं पुष्पमालाभिरापीठान्तं प्रलम्बिभिः ॥

अत्युच्चकैर्महायानैर्दिव्यगन्धोपशोभितैः ।
सर्वोपरिचरः श्रीमान् नास्ते शिवपुरे सुखी ॥

अनेकाकारविन्यस्तं कुसुमैर्गूहकं शिवे ।
यः कुर्यात्पर्वकालेषु विचित्रकुसुमोज्ज्वलम् ॥

सपुष्पकविमानानां सहस्त्रपरिवारितः ।
दिव्यस्त्रिसुखसंभोग क्रीडारतिसमन्वितः ॥

अक्षयं मोदते कालमतिरस्कृतशासनः ।
शिवादिसर्वलोकेषु यत्रेष्टं याति तत्र सः ॥

पूजादिभक्तिविन्यास रचनादिषु सर्वतः ।

फलमेतत्समासेन ज्ञेयं वित्तानुसारतः ॥

मालाभिर्वेष्टयेद्वेदिं लिङ्गं सम्पूज्ययत्नतः ।
लिङ्गं वेदिर्भवेद्देवी लिङ्गं साक्षान्महेश्वरः ॥

तयोः संपूजनात्स्यातां देवी देवश्च पूजितौ ।
स्वयमुत्पाद्यपुष्पाणि यः शिवं पूजयेत् स्वयम् ॥

तानि साक्षात् सुगृह्णाति तद्भक्त्या सततं शिवः ।
तावद्वर्षसहस्राणि रुद्रलोके महीयते ॥

यः प्रकुर्याच्छिवाराममाम्रविल्वादिशोभितम् ।
जातीविजयराजाकं करवीराब्जर्ककुब्जकैः ॥

पुन्नागनागवकुलैरशोकोत्पलचम्पकैः ।
कदलीहेमपुष्पाद्यैः तस्य पुण्यफलं शृणु ॥

यावत्तत्पत्रकुसुमं नीजसूतीफलानि च ।

तावत् वर्षसहस्राणि रुद्रलोके महीयते ॥

लाक्षा प्राण्यंगनिर्मुक्तं धूपं दद्यात् सकृत् सकृत्॥ शिवे ॥

प्। २०(२३)

चतुर्वेदि गृहे जन्म प्राप्नोति सततं सुखी।
कृष्णागरुं सकर्पूरं धूपं दद्यात् सकृच्छिवे ॥

नैरन्तर्येण मासार्धं तस्य पुण्यफलं शृणु।
कल्पकोटिसहस्राणि कल्पकोटिशतानि च ॥

भुङ्क्ते शिवपुरेभोगान् तस्यान्ते स महीपतिः।
गुग्गुलुं घृतसंयुक्तं साक्षाद् गृह्णाति शङ्करः ॥

मासार्धमासदानेन शिवलोके महीयते।
कृष्णपक्षे चतुर्दश्यां यः साज्यं गुग्गुलुं दहेत्।

अपराधसहस्रैकमिहामुत्रकृते शिवः।

क्षमतेशंकरो यस्मात् तस्माद्देयं शिवे सदा ॥

देवदारुं नमेरुं च सर्जं श्रीवासकुन्द्रतः ।
श्रीफलं चाज्यसंमिश्रं दत्वाप्नोति परां श्रियम् ॥

एभ्यस्सुगन्धधूपं तु षड्सहस्त्रगुणोत्तरम् ।
अगरुर्दशसाहस्त्रं द्विगुणं चासितागरुः ॥

गुग्गुलुः दशसाहस्त्रं सघृतो द्विगुणं भवेत् ।
प्रयच्छेद्गुग्गुलुं नित्यमाज्ययुक्तं विशेषतः ॥

द्वेसहस्त्रे फलानान्तु महिषाक्षस्य गुग्गुलोः ।
दग्ध्वाब्दमाज्यसंमिश्रं शिवतुल्यः प्रजायते ॥

नमेरुं घृतसंयुक्तं दग्ध्वा बिल्वमथापिवा ।
अग्निष्टोमस्य यज्ञस्य फलं प्राप्नोति मानवः ॥

शोधयेत् पापसंयुक्तं पुरुषं तु न संशयः ।

कृष्णागरुर्दहेत् पापं तुषाग्निरिवकाञ्चनम् ॥

योऽन्तः शिवपुरं सर्वं सुसुगन्धैः प्रलेपयेत् ।
कवाटद्वारकुड्यादितिर्यगूर्ध्वं सवैदिकम् ॥

वासयेत्पुष्पमालाभिः धूपैश्चापिसुगन्धिभिः ।
यः कुर्यात्सकृदप्येवं पुण्यं तदवधारय ॥

सर्वकामसुसंपूर्णैर्महायानैरनेकशः ।
आपूरयन् दिशः सर्वाः आयोजनसुगन्धिभिः ॥

कल्पकोटिशतं दिव्यं शिवलोके महीयते ।
तस्यान्ते धर्मशेषेण त्रैलोक्याधिपतिर्भवेत् ॥

ऋतावृतौ तु यः कुर्यात् देवगन्धैः शिवालयम् ।
स समस्तकुलोपेतः शिवलोके महीयते ॥

त्रिवृच्छुक्लं सुपीतं वा पट्टसूत्रादिनिर्मितम् ।

दत्वोपवीतं रुद्राय भवेद्वेदान्तगो नरः ॥

प्। २१(२४)

वासांसि सुविचित्राणि सारवन्ति मृदूनि च ।
धूपितानि शिवे दद्यात् द्विद्वैकानि नवानि च ॥

यावत्तद्वस्त्रतन्तूनां परिमाणं विधीयते ।
तावद्वर्षसहस्राणि रुद्रलोके महीयते ॥

त्रुटिमात्रं तु यो दद्यात् क्षेमं लिङ्गस्य मूर्धनि ।
इन्द्रस्यार्धासनी तावत् यावदिन्द्राश्चतुर्दश ॥

एवमेवानुसारेण फलं ज्ञेयं समासतः ।
सर्वेषां हेमपात्राणां मकुटानां च सर्वशः ॥

योऽर्कपर्णपुटं मधुपर्कस्य मन्त्रितम् ।
निवेदयीत शर्वाय सोऽश्वमेधफलं लभेत् ॥

शालीतण्डूलकप्रस्थं कुर्यादन्नं सुसंस्कृतम् ।
शिवाय तच्चरुं दद्याच्चतुर्दश्यां विशेषतः ॥

हारिद्रं कृसरं शुक्लं पायसं याचकं तथा ।
गुलखण्डाज्यसंमिश्रमेवमाद्यं निवेदयेत् ॥

यावन्तस्तण्डुलास्तस्मिन्नैवेद्यपरिसंख्यया ।
तावद्वर्षसहस्राणि शिवलोके महीयते ॥

गुलखण्डकृतानां च भक्षाणां विनिवेदने ।
घृतेन पालितं तस्मादन्नानां तच्चतुर्गुणम् ॥

मार्जितापानकाद्यानां भक्ष्यार्थं फलमिष्यते ।
तदर्धं सलिलस्यापि वासितस्य निवेदने ॥

मातुलुङ्गफलाद्यानि सुपक्वानि निवेदयेत् ।
शिवायतत्फलं तस्य यद्भक्षाणां निवेदने ॥

घृतदीपप्रदानेन शिवायशतयोजनम्।
याम्यं तमोलंघयित्वा विमानं सूर्यसन्निभम्॥

पञ्चसौगन्धिकोपेतं ताम्बूलं यो निवेदयेत्।
शिवाय गुरवे चैव तस्य पुण्यफलं शृणु॥

सुगन्ध तेजास्तेजस्वी सर्वावयवशोभितः।
वर्षकोटिशतं दिव्यं शिवलोके महीयते॥

यः कुर्यात्कार्तिकेमासि शोभनां दीपमालिकाम्।
घृतेन च चतुर्दश्याममावास्यां विशेषतः॥

सूर्यायुतप्रतीकाशतेजसा भासयेद्दिशः (यन्दिशः)।
तेजोराशिर्विमानस्थः कुलमुद्धृत्य सर्वतः।

यावत्प्रदीपसंख्यानां घृतेनापूर्यवोधितः।

तावद्युगसहस्राणि रुद्रलोके महीयते ।
दीपवृक्षान् समुद्बोध्य शिवस्या यतने शुभान् ॥

पूर्वस्माद्द्विगुणं पुण्यं लभते नात्र संशयः ।
स्थानदीपं समुद्बोध्य लोहगुच्छं शिवालये ॥

दत्वा कार्यासयुक्तं तु शिवलोके महीयते ।
शिरसा धारयेद्दीपं सर्वरात्रं शिवाग्रतः ॥

ललाटेवायहस्ताभ्यामुद्युक्तश्च तथोरसि ।
सूर्यायुतप्रतीकाशैर्विमानैरूपशोभितैः ॥

कल्पायुतशतं दिव्यं शिवलोके महीयते ।
शिवस्य पुरतो दद्याद्दर्पणं चारुनिर्मितम् ।

पर्यन्तशोभितं कृत्वा श्वेतमाल्यैश्च चन्दनैः ।
चन्द्रांशुनिर्मलः श्रीमान् सुभगः कामरूपधृक् ॥

कल्पायुतसहस्राणि शिवलोके महीयते ।
कृत्वा प्रदक्षिणं भक्त्या शिवस्या यतनं नरः ॥

अश्वमेधसहस्रस्य सुखेन लभते फलम् ।
नमस्कारः स्मृतो यज्ञ सर्वयज्ञोत्तमः शिवे ॥

नमस्कृत्वा महादेवमश्वमेधफलं लभेत् ।
प्रणम्य दण्डवद्भूमौ नमस्कारेण योऽर्पयेत् ॥

स यां गतिमवाप्नोति नतां क्रतु शतैरपि ।
सर्वयज्ञोपवासेषु सर्ववेदेषु यत्फलम् ॥

स्तुति जप्योपहारेण शिवे तत्फलमाप्नुयात् ।
श्वेतं महाध्वनं दद्यात् कृत्वा वै पञ्चरंगिकम् ॥

किङ्किणीरवकोपेतं मयूरछत्र शोभितम् ।
सशतेन विमानानां सर्वदेवोपरिस्थितः ॥

मन्वन्तरसहस्रैकं मोदते दिविरुद्रवत्।
ध्वजमालाकुलं कुर्याद्यः प्रसादं शिवालये॥

महाध्वजाष्टकं वापि दिग्विदिक्षुनिवेदयेत्।
सविमानसहस्रेण दिव्यध्वजसुशोभिना।

कल्पायुतशतं साग्रं मोदते दिविरुद्रवत्।
शरच्चन्द्रांशु विमलं मुक्ताजालोपशोभितम्॥

मणिदण्डमयं च्छत्रं दद्याद्वा काञ्चनादिना।
सच्छत्रेण विचित्रेण धार्यमाणेन शोभिभिः॥

विमानैः शतसंभोगैश्चिरं शिवपुरे सुखी।
यदिन्येद्राज्यमाकांक्षेत् स देही कालपर्ययात्॥

पू। २३(२६)

भुङ्क्तेसमुद्रपर्यन्तामेकच्छत्रां वसुन्धराम्।
यः शृंखला समायुक्तां महाघण्टां महास्वनाम्॥

कांस्यलोहमयीं वापि निबध्नीयाच्छिवालये ।
घण्टाकर्णगणः श्रीमान् शिवस्यातीववल्लभः ॥

शिवतुल्यबलोभूत्वा शिवलोकेवसेच्चिरम् ।
भेरीमृदंगपटहतिमिलामरवादिकम् ॥

वंशकांस्यादिवादित्रं यः शिवाय निवेदयेत् ।
सविमानैर्महाभोगैर्वंशवीणादिभिः स्वनैः ॥

युगायुतशतं साग्रं शिवलोके महीयते ।
स्त्रीसंगीत(क)दानेन सनादेन विशेषतः ॥

यथेष्टमैश्वरे लोके मोदते कालमक्षयम् ।
महं महास्वनं दत्वा शंखयुग्मं शिवालये ॥

युगकोटिमहाभोगैः शिवलोके महीयते ।
विमानं सितपद्माभं मध्ये करकभूषितम् ॥

विचित्रमेकवर्णं वा नववस्त्रादिशोभितम् ।
लम्बकैःसूत्रदामैश्च घण्टाचामरभूषितम् ॥

शिवस्योपरि यो दद्यात् पुरतो वापि कल्पयेत् ।
रुद्रवत् सर्वलोकेषु युगकोटिं स मोदते ॥

शिवस्योपरि यो दद्यात् सर्वरत्नोपशोभितम् ।
किंकिणीरवकोपेतं चन्द्रकैश्चोपशोभितम् ॥

मण्टपं मौक्तिकं श्रीमत्तस्य पुण्यफलं शृणु ।
कोटिकोटिविमानान्तं सर्वकामसमृद्धिभिः ॥

आभूतसंप्लवं यावत् तावच्छिवपुरे वसेत् ।
शर्वस्या यतनं कुर्यात् ववस्त्रपूजोपशोभितम् ॥

दुकूलपट्टदेवांगैर्वस्त्रैर्वा वर्णकान्वितैः ।
वस्त्रादिपट्टतन्तूनां परिसंख्या तु यावती ॥

तावद्युगसहस्राणि शिवलोके महीयते ।
शिवं स्तुत्वा जगत्सर्वं वृष्टिद्वारेण धार्यते ॥

यत्संधाय जगत्पुण्यमग्निकार्येण तद्भवेत् ।
यः कुर्यादिष्टकागारं रुद्राग्नेरतिशोभनम् ॥

सकृत्तत्राग्निकार्येण शिवसायुज्यमाप्नुयात् ।
शिवाग्निकार्यं यः कुर्यात् कुर्यादायुष्यमात्मनः ॥

मुच्यते पृथुभिः पापैः सितेन शिवभस्मना ।
कृत्वा शिवालयस्यान्ते दशमण्डलिकानि तु ॥

सर्वोपहारसंयुक्तं तेषां नित्यं बलिं हरेत् ।

प्र । २४(२७)

पुष्पधूपजलोपेतं ताम्रपात्रं प्रकल्पयेत् ।
रुद्रमातृगणादीनां दिक्पतीनां च सर्वतः ॥

यः कुर्यात् सकृदप्येवं दशादिक्षु बलिक्रियाम् ।
दशवर्षसहस्राणि शिवलोके महीयते ॥

रौद्रं सन्ध्याबलिं कृत्वा नित्यं पर्वसु वा निशि ।
कल्पायुतशतं साग्रं शिवलोके महीयते ।
दधिभक्तमयं लिङ्गं हेमपात्रादिषु स्थितम् ।
पुष्पधूपार्चितं कृत्वा वितानोपरिशोभितम् ॥

शिरसाधारयन् पात्रं शनैर्गच्छन् प्रदक्षिणम् ।
शिवायतनपर्यन्तं शंखभेर्यादिभिः स्वनैः ॥

दर्पणध्वजमालादिर्गेयनृत्तादिशोभितैः ।
छत्रचामरधूपाद्यैर्यष्टिदीपादिभिस्तथा ॥

तच्छेषदधिभक्तेन लिङ्गस्य पुरतः स्थितः ।
पुष्पाक्षतविमिश्रेण सर्वादिक्षुबलिं हरेत् ॥

एतेन मातरो रुद्राश्शिवोमाषण्मुखादयः ।
शान्तिं जुषन्ति सुप्रीता रौद्रेण बलिना सदा ॥

शिवमाल्यापनयनं पूजान्ते तु प्रमार्जनम् ।
एकैकमेकं तुल्यं स्याच्चान्द्रायणफलेन तु ॥

शिवमण्डलकं कृत्वा हस्तमात्रं शिवाग्रतः ।
अवकीर्याक्षतैः पुष्पैः पत्रैर्वाप्यथकेवलैः ॥

सुरूपः सुभगः श्रीमान् तेजस्वी वेदवित्सुखी ।
चतुर्वेदि गृहे जन्म सकृत्कृत्वा लभेन्नरः ॥

एवं स्वस्तिकपद्माद्यैर्भूमिशोभां शिवालये ।
कृत्वा वर्णकपिष्टाद्यैस्तस्माच्छतगुणं भवेत् ॥

शिवयज्ञोपकरणं दत्वाल्पं यदि वा बहु ।
एवं वित्तानुसारेण शिवलोके महीयते ॥

शिवमुद्दिश्य यद्दत्तं सर्वकारणकारणम्।
तदनन्तफलं दातुर्भवतीति किमद्भुतम्॥

यद्यदिष्टं विशिष्टं च न्यायेन च यदागतम्।
तच्छिवाय निवेद्यं स्याद् भक्त्यानन्यफलार्थिभिः॥

कर्मशाठ्येन यः कुर्यान्मूल्येनापि शिवालये।
सोऽप्यशाठ्योदिवं याति कर्मणापापवर्जितः॥

कूपारामान्नपानाद्यैः शिवायतनकर्मणि।
उपयुक्तानि भूतानि खननोत्पाटनादिषु॥

अकामतोऽपि सर्वाणि स्यावराणि चराणि च।

प्र। २५(२८)

दिवं यान्ति न सन्देहः प्रसादात् परमेष्ठिनः॥

लिङ्गार्धशतं साग्रं शिवक्षेत्रं समन्ततः।

देहिनां तत्र पञ्चत्वं शिवसायुज्यकारणम्॥

मनुजैः स्थापिते लिङ्गे क्षेत्रमानमिदं स्मृतम्।
स्वयं भूते सहस्रं स्यादार्षे च स्यात्तदर्धकम्॥

पापाचारोऽपि यस्तस्मिन् निवसेत शिवाश्रमे।
सयाति परमं स्थानं तस्माच्छिवपुरं स्मृतम्॥

तस्मादावसयं कुर्याच्छिवक्षेत्रसमीपतः।
शिवलिङ्गसमीपस्थं यत्तोयं पुरतश्शुभम्॥

शिवगङ्गेति तज्ज्ञेयं तस्मिन् स्नात्वा शिवं व्रजेत्।
यः कुर्याद्दीर्घिकांवापि कूपं वापि शिवाश्रमे॥

त्रिसप्तकुलसंयुक्तं शिवलोके महीयते।
शिवादन्यत्परित्यज्य शिवैकाहितमानसः॥

शिवपूजाविधिं कुर्याद्यदीच्छेच्छ्रेय आत्मनः।

त्वरितं जीवितं याति त्वरितं याति यौवनम्॥

त्वरितं व्याधिरभ्येति तस्मात् पूज्यः सदाशिवः।
यावन्नाभ्येति मरणं यावन्नाक्रमते जरा।
यावन्नेन्द्रियवैकल्यं तावत्पूजयशङ्करम्॥

न शिवार्चनतुल्योऽन्यो धर्मोऽस्तिभुवनत्रये।
इति विज्ञाय यत्वेन पूजनीयः सदाशिवः।
ये भक्ता देवदेवेशं शिवं शान्तमजं प्रभुम्॥

पूजयन्ति सदाभक्त्या तच्चित्तास्तपसि स्थिताः।
इह लोके सुखं प्राप्य ते यान्ति परमां गतिम्॥

संपूज्य पशुभर्तारं प्रहृष्टेनान्तरात्मना।
कृताञ्जलिपुटो भूत्वेदं स्तोत्रमुदाहरेत्॥

शिवं शिवकरं शान्तं शिवात्मानं शिवोत्तमम्।
शिवमार्गप्रणेतारं प्रणतोऽस्मि सदाशिवम्॥

शाश्वतं शोभनं शुद्धं शासकं दोष शोषकम्।
विश्वं विश्वेश्वरेशानं शङ्करं प्रणमाम्यहम्॥

सर्वपापहरं नाथं सर्वरोगहरं वरम्।
सर्वदुःखहरं नित्यं नमाम्यार्तिहरवरम्॥

अस्थानस्थानसंस्थानं स्थितस्थितिविभावनम्।
स्थिरमात्रस्थयोगस्थं स्थाण्वीशं प्रणमाम्यहम्॥

ईशानपरमं देवमीशानं मन्त्रनायकम्।
ईशानं सर्वभूतानामीशानं प्रणमाम्यहम्।

प्। २६(२९)

सर्वार्थसम्पदाधारो गणाध्यक्षो वरप्रदः।
रुद्रस्य तनयो देवो नायकोऽथ विनायकः॥

करोतु शान्तिकंक्षेमं कर्मसिद्धिञ्च मे सदा।

इन्द्रनीलनिभस्त्र्यक्षो दीप्तशूलायुधोद्यतः ॥

रक्ताम्बरधरश्श्रीमान् कृष्णाङ्गोनागभूषणः ।
अक्षमाला शिरोग्रस्तः स्वयं विष्णुरिव स्थितः ॥

पापापनोदमतुलमलक्ष्मीमलनाशनम् ।
करोतु मे महाकालः शान्तिं प्रीतेन चेतसा ॥

शंखकुन्देन्दुवर्णाभः कण्ठे मरतकप्रभः ।

चतुर्मुखाश्चतुर्बाहुस्त्रिणेत्रस्सर्वतोज्ज्वलः ।
करोतु मे महाशान्तिं प्रीतः प्रीतेन चेतसा ॥

क्षितेः पतिर्वृषोदेवस्सर्वधर्मोत्तमोत्तमः ।
ईशं वहतिपृष्ठेन तस्माद्धर्मो जगत्पतिः ॥

वृषोवृषधरश्श्रीमान् करोतु मम शान्तिकम् ।
सर्वज्ञः सर्वसदृशः सर्वगःश्शर्वजः प्रभुः ॥

शमनः शत्रुसैन्यानां शास्ताशान्तिं करोतु मे ।
करोतु मे महाशान्तिं प्रीतः प्रीतेन चेतसा ॥

पीतवस्त्रपरीधाना कन्यारूपास्वलंकृता ।
गणमाताम्बिका त्र्यक्षा शान्ता गौरी सुरेश्वरी ॥

सर्वसिद्धिकरा देवी प्रसादपरमा वरा ।
शान्तिं करोतु मे माता सिद्धिं चाशुप्रयच्छति(तु) ॥

स्निग्धश्यामेन वर्णेन महामहिषमर्दिनी ।
धनुश्चक्रप्रहरणा खड्गपट्टसधारिणी ॥

आतर्जनोद्यतकरा सर्वोपद्रवनाशिनी ।
सर्वमङ्गलमाता मे शिवमाशुप्रयच्छतु ॥

निर्मांसेन शरीरेण स्नास्वस्थिसुनिबन्धनः ।
अतिसूक्ष्मोतिविक्रान्तस्त्रयक्षोभिः किरिटिर्वरः ॥

रुद्रात्मनो रुद्रवीर्यो रुद्रैकगतमानसः।
सोविमेशान्तभावेन शिवमावहतुध्रुवम्॥

प्रचण्डगणसैन्येशो महाटंकाक्षधारकः।
अक्षमालार्पितकरस्त्र्यक्षश्चण्डेश्वरो महान्॥

प्रचण्डपापहरणो ब्रह्महत्यादिशोधकः।
करोतु मे महायोगी कल्याणानां परम्पराम्॥

पद्मासनो हेमनिभश्चतुर्वदनपङ्कजः।
कमण्डलुधरः श्रीमान् देवगन्धर्वपूजितः॥

शिवध्यानैकपरमश्शिवार्चनरतस्सदा।
ब्रह्मशब्देन दिव्येन ब्रह्माशान्तिं करोतु मे॥

ताक्ष्यासनश्चतुर्बाहुः शङ्खचक्रगदाधरः।

श्यामः पीताम्बरधरो वनमालाविभूषितः।
यज्ञदेवोत्तमो देवो माधवो मधुसूदनः॥

कृष्णनीलाञ्जनाकारश्शिवयोरसिलक्षणः।
शिवप्रसादसम्पन्नश्शिवध्यानपरायणः॥

शिवार्चनरतो नित्यं विष्णुश्शान्तिं करोतु मे।
पद्मरागप्रभा देवी चतुर्वदनपङ्कजा॥

अक्षमालार्पितकरा कमण्डलुधरा शुभा।
ब्रह्माणी सौम्यवदना शिवपूजापरायणा॥

शान्तिं करोतु मे प्रीता ब्रह्मशब्देन सर्वदा।
(हिमशैलन्निभा देवी चतुर्वदनपङ्कजा।
अक्षमालार्पितकराकमण्डलुधराशुभा॥

ब्रहाणी सौम्यवदना शिवपूजापरायणा।

शान्तिं करोतु मे प्रीता ब्रह्मशब्देन सर्वदा ॥)

हिमशैलनिभा देवी महावृषभवाहिनी ।
त्रिशूलहस्ता वरदा नागाभरणभूषिता ॥

रुद्रभक्ता महादेवी रुद्रार्चनरता सदा ।
चतुर्भुजा चतुर्वक्त्रा त्रिणेत्रा पापहारिणी ॥

आर्तिं हरतु मे प्रीता महादेवी महेश्वरी ।
मयूरवाहिनी देवी सिन्दूरारुणविग्रहा ॥

शक्तिहस्ता महावीर्या सर्वालङ्कारभूषिता ।
रुद्रभक्ता महापुण्या रुद्रार्चनरता सदा ॥

कौमारी वरदा देवी शान्तिमाशुकरोतु मे ।
शंखचक्रगदाहस्ता श्यामा पीताम्बराशुभा ॥

चतुर्भुजा तार्क्ष्यगता वैष्णवी सुरपूजिता ।
शिवार्चनरता नित्यं रुद्रैकगत मानसा ॥

शान्तिं करोतु मे नित्यं सर्वासुरविमर्दिनी ।
वराहथोणा विकटा वराहवरवाहिनी ॥

श्यामावदातविपुला शङ्खचक्रगदाधरा ।
तर्जयन्ती सदाविघ्ना नर्चयन्ती सदाशिवम् ॥

वाराही वरदा देवी क्षेमारोग्यं ददातु मे ।
ऐरावत गजारूढा वज्रहस्ता महाबला ॥

नेत्राणां तु सहस्रेण भूषिता कनकप्रभा ।
सिद्धगन्धर्वनमिता वरालंकारभूषिता ॥

ऐन्द्री देवी सदाकालं शान्तिमाशु करोतु मे ॥

प्। २८(३१)

श्यामः पीताम्बरधरो वनमालाविभूषितः ।
यज्ञदेवोत्तमो देवो माधवो मधुसूदनः ॥

कृष्णनीलाञ्जनाकारश्शिवयोरलिलक्षणः ।

शिवप्रसादसम्पन्नश्शिवध्यानपरायणः ॥

शिवार्चनरतो नित्यं विष्णुश्शान्तिं करोतु मे ।

पद्मरागप्रभा देवी चतुर्वदनपङ्कजा ।

अक्षमालार्पितकरा कमण्डलुधरा शुभा ॥

ब्रह्माणी सौम्यवदना शिवपूजा परायणा ।

शान्तिं करोतु मे प्रीता ब्रहमशब्देन सर्वदा ॥

हिमशैलन्निभा देवी चतुर्वदनपङ्कजा ।

अक्षमालार्पितकरा कमण्डलुधरा शुभा ॥

ब्रह्माणि सौम्यवदना शिवपूजापरायणा ।

शान्तिं करोतु मे प्रीता ब्रूहमशब्देन सर्वदा ॥)

हिमशैलनिभा देवी महावृषभवाहिनी ।

त्रिशूलहस्तावरदा नागाभरणभूषिता ॥

रुद्रभक्ता महादेवी रुद्रार्चनरता सदा ।
चतुर्भुजा चतुर्वक्त्रा त्रिणेत्रा पापहारिणी ॥

आर्तिहरतु मे प्रीता महादेवी महेश्वरी ।
मयूरवाहिनी देवी सिन्दूरारुणविग्रहा ॥

शक्तिहस्ता महावीर्या सर्वालङ्कारभूषिता ।
रुद्रभक्ता महापुण्या रुद्रार्चनरता सदा ।
कौमारी वरदा देवी शन्तिमाशुकरोतु मे ॥

शंखचक्रगदाहस्ता श्यामा पीताम्बरा शुभा ।
चतुर्भुजा तार्क्ष्यगता वैष्णवी सुरपूजिता ॥

शिवार्चनरता नित्यं रुद्रैकगतमानसा ।
शान्तिं करोतु मे नित्यं सर्वासुरविमर्दिनी ॥

वराहथोणा विकटा वराहवरवाहिनी ।

श्यामावदातविपुला शङ्खचक्रगदाधरा ॥

तर्जयन्ती सदा विघ्नानर्चयन्ती सदा शिवम् ।
वाराही वरदा देवी क्षेमारोग्यं ददातु मे ।
ऐरावत गजारूढा वज्रहस्ता महाबला ॥

नेत्राणां तु सहस्रेण भूषिता कनकप्रभा ।
सिद्धगन्धर्वनमिता वरालंकारभूषिता ।
ऐन्द्री देवी सदाकालं शान्तिमाशुकरोतु मे ॥

पू । २९(३२)

ऊर्ध्वकेशोत्कटाक्षामा निर्मांसास्नायुबन्धना ।
करालवदनाघोरा खड्गपट्टसधारिणी ॥

कपालमालिनी देवी क्रूरा खट्वांगधारिणी ।
आरक्तपिङ्गनयना गजचर्मावकुण्ठिता ॥

नाना नागोपवीतांगी प्रेतस्थाननिवासिनी ।

शिवारूपेणघोरेण शिवारावभयङ्करी ॥

चामुण्डी चण्डरूपेण महारक्षां करोतु मे ।
आकाशमातरो देव्यस्तथालोकैकमातरः ॥

भूतानां मातरस्सर्वास्तदन्या देवमातरः ।
सर्वमातृगणा देव्यस्सायुधाव्यग्रपाणयः ॥

जगद्व्याप्यावतिष्ठन्ति बलिकामा महोदया ।
रुद्रभक्ता महादेवीर्या रुद्रार्चन परायणाः ॥

शान्तिं कुर्वन्तु मे नित्यं मातरस्सुरपूजिताः ।
ये रुद्रा रौद्रकर्माणी रौद्रस्थान निवासिनः ॥

स सौम्याश्चैव ये केचित् सौम्यस्थाननिवासिनः ।
मातरो रौद्ररूपाश्च गणानामधिपाश्च ये ।
विघ्नभूतास्तथाचान्ये दशादिक्षुसमाश्रिताः ॥

सर्वेसुप्रीतमनसः प्रतिगृह्णन्तु मद्बलिम् ।
सिद्धिजुषन्तु मे नित्यं भयेभ्यः पातुमां सदा ॥

ऐन्द्र्यां दिशि गणाये तु वज्रहस्ता महाबलाः ।
सुश्वेताक्षाः श्वेतान्निभास्तथा वै श्वेतलोहिताः ॥

दिव्यन्तरिक्षभौमाश्च पातालतलवासिनः ।
रुद्रार्चनपराः क्षेमं शान्तिं कुर्वन्तु मे सदा ॥

आग्नेयां ये गणास्सर्वे स्रुवहस्ता निषङ्गिणः ।
सुरक्ताक्षारक्तनिभास्तथा वै रक्तलोहिताः ॥

दिव्यन्तरिक्षभौमाश्च पातालतलवासिनः ।
रुद्रप्रणामपरमाः शान्तिं कुर्वन्तु मे सदा ।
याम्यां दिशिगणा ये तु सततं दण्डपाणयः ॥

सुकृष्णाक्षाः कृष्ण निभास्तथा वै कृष्णलोहितः ।
दिव्यन्तरिक्षभौमाश्च पातालतलवासिनः ॥

ते रुद्रार्चितचेतस्काः शिवं कुर्वन्तु मे सदा ।
नैर्-ऋत्यां तु गणा ये तु राक्षसाः खड्गपाणयः ॥

सुनीलाक्षानीलनिभास्तथा वै नीललोहिताः ।
दिव्यन्तरिक्षभौमाश्च पातालतलवासिनः ॥

प्। ३०(३३)

परमेशार्चनरता रक्षां कुर्वन्तु मे सदा ।
अपरस्यां गणा ये तु सततं पाशपाणयः ॥

सुश्यामाक्षाश्श्यामनिभास्तथा वैश्यामलोहिताः ।
दिव्यन्तरिक्षभौमाश्च पातालतलवासिनः ॥

शिवभक्तिपरास्सर्वे क्षेमं कुर्वन्तु मे सदा ।
वायव्यां तु गणा ये तु सततं ध्वजपाणयः ॥

सुधूम्राक्षा धूम्रनिभास्तथा वै धूम्रलोहिताः ।

दिव्यन्तरिक्षभौमाश्च पातालतलवासिनः ॥

शिवभक्ता महात्मानः कुर्वन्तु मम शान्तिकम् ।
उत्तरस्यां गणा ये तु सततं निधिपाणयः ॥

सुपीताक्षाः पीतनिभास्तथा वै पीतलोहिताः ।
दिव्यन्तरिक्षभौमाश्च पातालतलवासिनः ॥

शिवभक्तिरमास्सर्वे क्षेमं कुर्वन्तु मे सदा ।
ऐशान्यां तु गणा ये तु सततं शूलपाणयः ॥

सुसूक्ष्माक्षाः सूक्ष्मनिभास्तथा वै सूक्ष्मलोहिताः ।
दिव्यन्तरिक्षभौमाश्च पातालतलवासिनः ॥

ऐशानं प्रणता देवं शान्तिं कुर्वन्तु मे सदा ।
अधोभागे गणा ये तु सततं चक्रपाणयः ॥

सुपीताक्षाः पीतनिभास्तथा वै पीतलोहिताः ।

दिव्यन्तरिक्षभौमाश्च पातालतलवासिनः ॥

शिवभक्तिपराः कुर्युरलक्ष्मीमलनाशनम् ।
ऊर्ध्वभागे गणा ये तु सततं पद्मपाणयः ॥

सुपद्माक्षाः पद्मनिभास्तथा वै पद्मलोहिताः ।
दिव्यन्तरिक्षभौमाश्च पातालतलवासिनः ॥

शिवपूजासमुद्युक्ता अशुभं नाशयन्तु मे ।
एते गणा महात्मानो महाबलपराक्रमाः ॥

शिवं सम्पूज्य यत्नेन बलिमेषां विनिक्षिपेत् ।
ततः प्रीता महात्मानः शान्तिमायुर्बलं श्रियम् ॥

प्रयच्छन्त्याशुमर्त्यानां भक्तानां तु विशेषतः ।
अमरावती तु नगरी पूर्वभागे व्यवस्थिता ॥

विद्याधरगणाकीर्णा सिद्धगन्धर्वसेविता ।

रत्नप्राकाररचिता महारत्नोपशोभिता ॥

तत्र देवपतिः श्रीमान् वज्रहस्तो महाबलः ।
नेत्राणां तु सहस्रेण शोभनेन विराजिता ॥

प्। ३१(३४)

ऐरावतगजारूढो हेमवर्णो महाद्युतिः ।
देवेन्द्रः सततं हृष्टः परमेशार्चने रतः ॥

शिवध्यानैकपरमः शिवभक्तिपरायणः ।
शिवभक्तैस्तथान्यैश्च देवैरिवसहानुगैः ॥

शिवप्रणामपरमः करोतु मम शान्तिकम् ।
आग्नेय्यां दिशिभागे तु पुरी तेजोवती शुभा ॥

नानावर्णगणाकीर्णा रत्नज्वालासमुज्ज्वला ।
तत्र ज्वालापरीतांगो दीप्तांगारसमद्युतिः ।
भूतिकृद्देहिनां देवो ज्वलनः पापनाशनः ॥

शिवपूजापरोद्युक्तः शिवस्मरणभावितः।
शान्तिं करोतु मे देवस्तथा पापपरिक्षयम्॥

वैवस्वती नामपुरी दक्षिणेन व्यवस्थिता।
सुरासुरशतानीक पितृरक्षोरगालया॥

तत्रेन्द्रनीलसंकाशो रक्तान्तायतलोचनः।
महामहिषमारूढः कृष्णस्रग्वस्त्रभूषणः॥

श्रीमान्यमो महातेजाः शिवपूजापरायणः।
शिवपूजासमासक्तः क्षेमारोग्यं ददातु मे॥

नैर्-ऋत्यां तु दिशोभागे पुरीकृष्णवती शुभा।
महारक्षोगणाकीर्णा पिशाचप्रेतसंकुला॥

तत्रजीमूतसंकाशो रक्तस्रग्वस्त्रभूषणः॥

खड्गपाणिर्महातेजाः करालवदनोज्ज्वलः।
रक्षेन्द्रोनिर्-ऋतिर्नित्यं शिवपूजापरायणः॥

करोतु मे महाशान्तिं शिवभक्तिसमुद्यतः।
पश्चिमे तु दिशोभागे पुरी शुद्धवती शुभा।
नानानागगणाकीर्णा नानाकिंनरसेविता।
तत्र मौक्तिकसंकाशः परिपिङ्गललोचनः॥

शुक्लवस्त्रपरीधानः पाशहस्तो महाबलः।
वरुणः परयाभक्त्या शिवैकाहितमानसः।
रोगशोकार्तिसन्तापं निर्नाशयतु मे सदा॥

वायव्यदिग्विभागे तु पुरी गन्धवती शुभा।
ऋणिसिद्धगणैर्जुष्टा हेमप्राकारतो रणा॥

तत्र ताम्रेण देहेन कृष्णपिंगललोचनः।
परव्याप्तान्तराधीनो ध्वजयष्ट्या युधोद्यतः॥

पवनः परमोदेवः परमेश्वरभावितः।

क्षेमारोग्यं बलं शान्तिं करोतु विजयं तथा (मम) ॥

महोदया नामपुरी उत्तरेण महोज्ज्वला।

पृ। ३२(३५)

अनेक यक्षसंकीर्णा नानारत्नोपशोभिता।

तत्र देवो गदा हस्तश्चित्रस्रग्वस्त्र भूषणः।

ह्रस्वबाहुर्महातेजाः परिपिङ्गललोचनः ॥

कुबेरो वरदश्श्रीमान् हरपादार्चने रतः।

शान्तिं करोतु मे प्रीतः शान्तश्शान्तेन तेजसा ॥

यशीवती नाम पुरी ऐशानीं दिशमाश्रिता।

नानागणसमाकीर्णा नानारत्नकृतालया ॥

तेजः प्राकारपर्यन्ता निरौपम्य गुणान्विता।

तत्र मौक्तिकसंकाशः शशाङ्ककृतशेखरः ॥

त्रिणेत्रश्शान्तरूपात्मा अक्षमाला धरो हरः ।
ईशानः परमोदेवः सर्वदेवोत्तमोत्तमः ॥

सोऽपि सर्वात्मभावेन शान्तिमाशुकरोतु मे ।
भूर्लोके च भुवर्लोके स्वर्गलोकेवसन्ति ये ॥

देवादिव्यप्रदायुक्ताः शान्तिं कुर्वन्तु मे सदा ।
महर्लोके जनर्लोके तपोलोके च ये स्थिताः ॥

तेऽपि प्रमुदिता देवाः शान्तिं कुर्वन्तु मे सदा ।
सत्यलोके च ये देवाः सुप्रभोज्ज्वलविग्रहाः ॥

शिवभक्तास्सुमनसः शान्तिं कुर्वन्तु मे सदा ।
तपोलोके च ये देवाः भासयन्तो दिशो दश ॥

शिवैकाहितचेतस्काः शमयन्तु महाभयम् ।
जनलोके च ये देवाः धौतचामीकरप्रभाः ॥

ईश्वरं प्रणता नित्यं शान्तिं कुर्वन्तु मे सदा ।
महर्लोके च ये देवा विमानोज्वलसंस्थिता ॥

भवप्रणामपरमाः भयं निर्नाशयन्तु मे ।
स्वर्लोकस्याश्च ये देवा दीप्तिमन्तो महाबलाः ॥

शङ्करं प्रणता नित्यं कुर्वन्तु विजयं मम ।
भुवर्लोके च ये देवा भासमन्तो दिशोदश ॥

शिवैकाहितचेतस्काः शमयन्तु महाभयम् ।
गिरिकन्दर्दुर्गेषु भूर्लोके निवसन्ति ये ॥

रुद्रार्चनपरादेवा रक्षां कुर्वन्तु मे सदा ।
शरच्चन्द्रांशु गौरेण देहेनामल चेतसा ।
सरस्वती शिवे भक्ता सर्वान् कामान् ददातु मे ॥

चारुचामीकरच्छाया सरोजकरपल्लवा ।

शिवभक्त्याधियां देवी श्रीर्विभूतिं ददातु मे ॥

वारुणा मुखचन्द्रेण विचित्रकनकोज्ज्वला ।
सदा देवी शिवेभक्ता सर्वान् कामान् ददातु मे ॥

प्। ३३(३६)

हारेण सुविचित्रेण भास्वत्कनकमेखला ॥

अपराजितारुद्रभक्ता करोतु विजयं मम ।
सिन्धूरारुणवर्णश्च रक्तायतविलोचनः ॥

सहस्रकिरणः श्रीमान् सप्तसप्तिकवाहनः ।
गभस्तिमाली भगवान् शिवभक्त्यार्चने रतः ॥

करोतु मे महाशान्तिं ग्रहपीडानिवारणम् ।
जगदाप्यायनकरो ह्यमृताधारशितला ॥

सोमः सौम्ये न भावेन ग्रहपीडां व्यपोहतु ।

पद्मरागेण देहेन देवः पिंगललोचनः ॥

अङ्गारकस्तुसततं रुद्रपूजापरायणः ।
रुद्रसद्भावसम्पन्नो रुद्रध्यानैकमानसः ॥

ग्रहपीडाभयं सर्वं निर्नाशयतु मे सदा ।
कुंकुमच्छविना श्रीमान् देहेन परिमण्डलः ॥

शिवभक्तो बुधोऽप्येवं ग्रहपीडां व्यपोहतु ।
तप्तचामीकरच्छायः सर्वज्ञानकृतालयः ।
बृहस्पतिः सदाकालमीशानार्चनतत्परः ।
सोऽपि मे शान्तचित्तेन परमेणसमाहितः ॥

ग्रहपीडां विनिर्जित्य करोतु विजयं मम ।
हिमकुन्देन्दुवर्णाभः सुरदैत्येन्द्रपूजितः ।
शुक्रः शिवार्चने नित्यं ग्रहपीडां व्यपोहतु ।
भिन्नाञ्जननिभच्छायः संरक्तनयनद्युतिः ॥

शनैश्चराग्निशवेभक्तो ग्रहपीडां व्यपोहतु ।
नीलजीमूतसंकाशः सैंहिकेयो महाबलः ॥

शिवपूजापरोराहुर्ग्रहपीडां व्यपोहतु ।
भिन्नाञ्जननिभः श्रीमानुल्काहस्तो महाबलः ॥

धूम्रज्वालाकुलो दीप्तः शिवार्चनरतस्सदा ।
केतुः सुशान्तचित्तेन ग्रहपीडां व्यपोहतु ॥

धूम्रवर्णः सदाक्रूरो मृत्युपुत्रो महाबलः ।
शिवार्चनरतः केतुः ग्रहपीडां व्यपोहतु ॥

एते ग्रहा महात्मानश्शिवार्चनपरायणाः ।
शान्तिं कुर्वन्तु मे हृष्टास्सदाकालं हितैषिणः ॥

कृत्तिका परमादेवी रोहिणी रुचिरानना ।
श्रीमन्मृगशिरोभद्रा आर्द्रा च परमोज्ज्वला ॥

पुनर्वसुस्तथा पुष्या आश्लेषा तु महाबला ।
नक्षत्रमातरोह्येता प्रभामालावदास्तिताः ॥

पू । ३४(३७)

महादेवार्चनरता महादेवानुभाविताः ।
पूर्वभागे स्थिता ह्येताश्शान्तिं कुर्वन्तु मे सदा ॥

मखा सर्वगुणोपेता पूर्वफल्गुन्यनूपमा
उत्तरा फल्गुनीश्रेष्ठा हस्तचित्रे तथोत्तमे ॥

स्वाती विशाखा वरदा * * दक्षिणसंस्थिताः ।
अर्चयन्ति सदाकालं देवं त्रिणयनं परम् ॥

ममापि शान्तिकं ह्येताः कुर्वन्तु शिवचोदिताः ।
अनूराधा तथा ज्येष्ठा मूला ऋद्धिबलान्विताः ॥

पूर्वाषाढा महावीर्या आषाढा चोत्तरा शुभा ।
अभिजिन्नामनक्षत्रं श्रवणः परमोज्वलः ॥

एताः पश्चिमतो दीप्ताः राजन्ते चारुमूर्तयः।
ईशानं पूजयन्त्येताः सार्वकालं सुभाविताः।
शान्तिकर्मे प्रयच्छन्तु विभूतिं च समाहिताः॥

धनिष्ठाशतभिषा चैव पूर्वाभद्रपदा तथा।
उत्तराभद्रेवत्या वश्विनी च महर्धिका॥

भरणी च महावीर्या नित्यमुत्तरतः स्थिताः।
शिवार्चने सदोद्युक्ताः शिवध्यानैक तत्पराः॥

शान्तिं कुर्वन्तु मे नित्यं सदाकालं शुभोदयाः।
मेषो मृगाधिपः सिंहो धनुर्दीप्तिमतांवरः॥

पूर्वेण भासयन्त्येते शिव योगपरायणाः।
शुभाः कुर्वन्तु ते नित्यं हरपादार्चने रताः॥

कन्या च वृषभो देवो मकरश्च महर्धिकाः।

एते दक्षिणभागे तु पूजयन्ति सदा शिवम्।

भक्त्या परमया नित्यं शान्तिं कुर्वन्तु मे सदा।
मिथुनं तु तुलाकुम्भः पश्चिमेन व्यवस्थिताः।

शिवपादार्चनरताः क्षेमं कुर्वन्तु मे सदा।
कर्कटो वृश्चिकोमीनः एते उत्तरतः स्थिताः॥

यजन्त्ये ते सदा कालं रुद्रं भुवननायकम्।
शान्तिं कुर्वन्तु मे नित्यं रुद्रज्ञानविधायिनः॥

ऋषयः सप्तविख्याताः ध्रुवान्ताः परमोज्ज्वलाः।
शिवप्रसादसम्पन्नाश्शान्तिं कुर्वन्तु मे सदा॥

कश्यपो गालवो गार्ग्यो विश्वामित्रो महामुनिः।
मनुर्दक्षो वसिष्ठोऽथ मतंगः पुलहः क्रतुः॥

नारदो भृगुरात्रे यो भरद्वाजोंगिरा मुनिः।

प्। ३५(३८)

वाल्मीकिः कौशिकः कण्वः शाकल्योऽथ पुनर्वसुः॥

दूर्वासाशृश्यशृङ्गश्च तृणबिन्दुर्विमण्डकः।
दण्डी च पिप्पलादश्च याज्ञवल्क्योऽथ गौतमः॥

मार्कण्डेयो जामदग्न्यः पुलस्त्यस्सौमरिः शुभः।
अगस्त्यो जैमिनिर्व्यासो मरीचिर्जहुरेव च।
शालङ्कायन इत्याद्या ऋषयोऽथ तपस्विनः॥

शिवध्यानार्चनरताः शान्तिं कुर्वन्तु मे सदा।
ऋषिपत्न्यो महाभागा ऋषिकन्या कुमारकाः॥

शिवार्चनरता नित्यं शान्तिं कुर्वन्तु मे सदा।
सिद्धास्स्मृद्धतपसो गन्धर्वाप्सरसां गणाः॥

विद्याधरा महात्मानो गरुडश्च महर्धिकः।

महेश्वरपराह्येते महेश्वरपरार्चनाः ॥

सिद्धिमाशुप्रयच्छन्तु आशीर्वादपरायणाः ।
नमुचिर्दैत्यराजेन्द्रश्शङ्कुकर्णो महाबलः ॥

महानादोऽथविख्यातो दैत्यः परमवीर्यवान् ।
हाटकेश्वरदेवस्य नित्यं पूजापरायणः ॥

बलं वीर्यं च मे क्षिप्रं प्रयच्छन्तु महर्धिकाः ।
महाजंभोह्यग्रीवः प्रह्लादो दैत्यराट् प्रभुः ।
तारकोऽग्निमुखो दैत्यः कालनेमिर्बलिस्तथा ॥

एते दैत्या महात्मानश्शिवसद्भावभाविताः ।
पुष्टिं तथा बलं वीर्यं प्रयच्छन्तु सुरारयः ॥

विरोचनो हिरण्याक्षः सुपर्वा च पुलोमकः ।
मुचुकुन्दः सुकुन्दश्च दैत्यो रैवतकस्तथा ॥

भावेन परमेणापि यजन्ति परमं शिवम् ।
सततं च शुभात्मानः पुष्टिं कुर्वन्तु मे सदा ॥

दैत्यपत्न्यो महाभागा दैत्यानां कन्यकाः शुभाः ।
कुमारा ये च दैत्यानां शान्तिं कुर्वन्तु तेऽपि मे ॥

आरक्ते न शरीरेण रक्तान्ता यतलोचनः ।
अनन्तो नागराजेन्द्रः शिवपूजार्चनिरतः ॥

महापापविषं हत्वा शान्तिमाशु करोतु मे ।
सुश्वेतेन शरीरेण सुश्वेतमणिशेखरः ।
चारुभोगकृताटोप हरचारुविभूषणः ॥

वासुकिर्नामनागेन्द्रश्शिवपूजा परोमहान् ।
सर्वनागविषं हत्वा क्षेमारोग्यं ददातु मे ॥

प्। पू। ३६(३९)

अतिपीतेन देहेन विस्फुरद्भोगसम्पदा ।

तेजसा चातिदीप्तेन नृतस्वस्तिकलाञ्छनः ॥

नागराट् तक्षकः श्रीमान् नागकोट्यासमावृतः ।
करोतु मे महाशान्तिं सर्वदोषविषापहाम् ॥

अतिकृष्णेन देहेन स्फुरद्विकटमस्तकः ।
कण्ठरेखा त्रयोपेतो घोरदंष्ट्रा युधोद्यतः ॥

कार्कोटको महानागो विषदर्पबलान्वितः ।
विषशस्त्राग्निसन्तापं हत्वा शान्तिं करोतु मे ॥

पद्मवर्णेन देहेन चारुपद्मायतेक्षणः ।
पद्मबिन्दुकृताभासो ग्रीवायां शुभलक्षणः ॥

ख्यातः पद्मो महानागो हरपादार्चने रतः ।
करोतु मे महाशान्तिं महापापविषक्षयम् ॥

पुण्डरीक निभे नैव देहेनामिततेजसा ।

शंखशूलाब्जरुचिरैः भूषितौ मूर्ध्नि सर्वदा ॥

महापद्मो महानागो नित्यं पशुपतौरतः ।
विनिर्जित्यविषंघोरं शान्तिमाशु करोतु मे ॥

श्यामो देहेन हारेण श्रीमान् कमललोचनः ।
विषदर्पबलोन्मत्तो ग्रीवायामेकरेखया ॥

शंखपालश्रियादीप्ताशिशवपादाब्जपूजकः ।
महाविषं महाघोरं हत्वाशान्तिं करोतु मे ॥

अतिगौरेण देहेन चन्द्रार्धकृतमस्तकः ।
दीप्तभोगकृता टोपः शुभलक्षणलक्षितः ॥

गुलिकोनागराजेन्द्रो नित्यं हरपरायणः ।
अपहृत्यविषंघोरं करोतु मम शान्तिकम् ॥

अन्तरिक्षे च ये नागा ये नागाः स्वर्गसंस्थिताः ।

गिरिकन्दरदुर्गेषु ये नागा दिविसंस्थिताः।

पाताले ये स्थिता नागाः सर्वेऽप्यत्रसमाहिताः।
हरपादार्चने युक्ताः शान्तिं कुर्वन्तु मे सदा॥

नागिन्यो नागकन्याश्च तथा नागकुमारकाः।
शिवभक्ताः सुमनसः शान्तिं कुर्वन्तु मे सदा॥

य इदं नागसंस्थानं कीर्तयेच्छृणुयादपि।
तं च नागनहिंसन्ति विषं नाक्रमते सदा॥

चिन्तितं लभते नित्यं तथा पापक्षयो भवेत्।
सिद्धिं चापि प्रयच्छन्ति सर्वविघ्नविवर्जिताम्॥

प्। ३७(४०)

सुरभी देवी गोलोके वसती शुभलक्षणा।
सततं क्षीरधाराढ्या ब्रह्मर्षिगणपूजिता॥

गोगणैर्गोवृषैर्नित्यं प्रहृष्टा परिवारिता ।
शिवभक्तासदाशान्ता शान्तिमाशुकरोतु मे ॥

एते च गोगणाः सर्वे गोवृषाश्च महौजसः ।
शिवभक्ता महात्मानः शान्तिं कुर्वन्तु मे सदा ॥

गङ्गापुण्यप्रदा देवि यमुनानर्मदा नदी ।
गोमती तापिकापेण्णा वरुणादेविकावरा ॥

सर्वभूतपतिं देवं परमेशं महेश्वरम् ।
पूजयन्ति महानद्यः शिवसद्भाव भाविताः ॥

शान्तिं कुर्वन्तु मे नित्यं तथा पापपरिक्षयम् ।
सिद्धिं चाशुप्रयच्छन्तु सर्वविघ्नविवर्जितम् ॥

चन्द्रभागा महापुण्या नदीगोदावरी शुभा ।
सरयू गण्डकी श्रेष्ठा कौशिकी च सरस्वती ॥

एता नद्यो महाभागा शिवपादार्चने रताः।
शान्तिं कुर्वन्तु मे नित्यं शिवध्यानैकमानसाः॥

नैरञ्जना नाम नदी शोणश्चापि महानदः।
मन्दाकिनी च परमा तथा सन्निहिताः शुभाः॥

एताश्चान्याश्चैवह्न्यो भुवि दिव्यन्तरिक्षगाः।
रुद्रार्चनपरा(नित्यं)नद्यः कुर्वन्तु मम शान्तिकम्॥

गुह्यानि यानि तीर्थानि आसमुद्रसरांसि च।
कुर्वन्तु शान्तिकं तानि श्रीकण्ठाधिष्ठितानि तु॥

महावैश्रवणो यक्षो यक्षराजोमहर्धिकः।
यक्षकोटिपरीवारो यक्षसंख्येयसंयुतः॥

महाविभवसम्पन्नो हरपादार्चनेरतः।
हरध्यानैकपरमो हरपादानतोत्तमः॥

शान्तिं करोतु मे प्रीतः पद्मपत्रायतेक्षणः।
माणिभद्रमहायक्षो मणिरत्नविभूषितः॥

मनोहरेण हारेण कण्ठलग्नेन राजता।
शिवगानरतो नित्यं शिवपादाब्जपूजकः॥

शान्तिं करोतु मे नित्यं सर्वदोषनिवारणः।
यक्षिणी यक्षकन्याभिः परिवारितविग्रहः॥

रुद्रार्चनपरोभक्तः करोतु मम शान्तिकम्।
सुवीरस्तु महायक्षो मणिकुण्डलभूषितः॥

पू। ३८(४१)

ललाटे हेमपट्टेन काञ्चनेन विराजता।
बहुयक्षसमाकीर्णो यक्षैर्नमितविग्रहः॥

शिवपूजापरोनित्यं करोतु मम शान्तिकम्।
चाण्डिको नाम यक्षेन्द्रः कर्णिका कटकोज्ज्वलः॥

मकुटेन विचित्रेण केयूराभ्यां विभूषितः।
यक्षकन्यासमायुक्तो यक्षसंख्येयसंयुतः॥

हरार्चनपरः श्रीमान् करोतु मम शान्तिकम्।
श्रीमान् विभण्डको यक्षो नानारत्नविभूषितः॥

चारुकुण्डलयुग्मेन कर्णौ नित्यं विराजतः।
यक्षेश्वरो यक्षपतिर्यक्षसेनापतिर्विभुः॥

हरपादरतः श्रीमान् करोतु मम शान्तिकम्।
धृतराष्ट्रो महायक्षो यक्षरक्षोऽधिपः प्रभुः॥

दिव्यपट्टांशुकच्छन्नो मणिकाञ्चनभूषितः।
शिवभक्तः शिवध्यानश्शिवपूजापरायणः॥

शिवप्रसादसम्पन्नः करोतु मम शान्तिकम्॥

पूर्णभद्रो महायक्षः सर्वालंकारभूषितः ॥

रत्नसम्पन्नपट्टेन हैमेनापि विराजता ।
यक्षकोटिसहस्रैस्तु परिवारितविग्रहः ॥

रुद्रप्रणामपरमो रुद्रभक्तिपरः सदा ।
रुद्रार्चनसमुद्युक्तः करोतु मम शान्तिकम् ॥

विरूपाक्षस्तु यक्षेन्द्रः श्वेतवासा महाद्युतिः ।
चारुकाञ्चनमालाभिः किङ्किणीरवकान्वितः ।
विभूषितः सदाकालं वरदानैकतत्परः ।
रुद्रपूजा परोभक्तः करोतु मम शान्तिकम् ॥

अन्तरिक्षगता यक्षा ये यक्षाः स्वर्गसंस्थिताः ।
गिरिकन्दरदुर्गेषु ये यक्षा भुवि वासिनः ॥

पातालवासिनो यक्षा नानारूपोद्यतायुधाः ।
शिवभक्ताः सुमनसः शिवपूजासमुत्सुकाः ॥

शान्तिं कुर्वन्तु मे हृष्टाः शान्ताश्शान्तिपरायणाः ।
यक्षिण्यो विविधाकारास्तथा यक्षकुमारिकाः ॥

यक्षकन्या महाभागाः शिवार्चनपरायणाः ।
शान्तिं स्वस्त्ययनं क्षेमं बलं कल्याणमद्भुतम् (मुत्तमम्) ।
सिद्धिं चाशुप्रयच्छन्तु नित्यमेवसमाहिताः ॥

पर्वताः सर्वतस्सर्वे पर्वत्यश्च महर्धिकाः ॥

प्। ३९(४२)

शिवभक्ताः सदाकालं क्षेमं कुर्वन्तु मे सदा ।
समुद्राः सर्वतस्सर्वे ये चान्ये सागरः भुवि ॥

रुद्रार्चनरतानित्यं कुर्वन्तु मम शान्तिकम् ।
राक्षसाः सर्वतस्सर्वे राक्षसाघोररूपिणः ॥

राक्षसा ये महावीर्या राक्षसा ये महाबलाः ।

स्वर्गस्था राक्षसा ये तु अन्तरिक्षे च राक्षसाः ॥

पाताल राक्षसा ये तु नित्यं रुद्रार्चने रताः ।
शान्तिं कुर्वन्तु मे नित्यं सततं शिवभाविताः ॥

भैरवं यस्य रूपन्तु प्रेतभस्मावकुण्ठितम् ।
तेजसा तस्य देवस्य शान्तिं कुर्वन्तु मे सदा ॥

नित्यमुज्वलवेषेण योगिन्योऽथ महाबलाः ।
अनेकरूपधारिण्यो डाकिन्यश्च महर्धिकाः ॥

रुद्रप्रणामपरमा रुद्ररूपार्चनेरताः ।
रुद्रैकाहितचेतस्काः कुर्वन्तु मम शान्तिकम् ॥

अन्तरिक्षे गतायाश्च डाकिन्यः स्वर्गसंस्थिताः ।
पातालभूतलेयाश्च गिरिदुर्गेषु संस्थिताः ॥

तृतीयं लोचनं यस्य त्रिशूलं भस्मभासुरम् ।

तेजसा तस्य देवस्य शान्तिं कुर्वन्तु मे सदा ॥

सर्वे भूता महारूपास्सर्वे भूता महोज्ज्वलाः ।
सर्वे भूताः स्थिताः सौम्याः सर्वे भूतामनोजवाः ॥

अन्तरिक्षे च ये भूता ये भूतादिविसंस्थिताः ।
पातालभूतले भूता भूताभूतिविदायिनः ॥

खट्वांगं यस्य विमलं त्रिशूलं करपल्लवे ।
तेजसा तस्य देवस्य शान्तिं कुर्वन्तु मे सदा ॥

शूराः प्रेतगणाः सर्वे ये प्रेताः सर्वतो मुखाः ।
अति दीप्ताश्च ये प्रेताः ये प्रेता रुधिराननाः ॥

अन्तरिक्षे च ये प्रेताः ये प्रेतास्स्वर्ग वासिनः ।
पातालो भूतले प्रेताः ये प्रेताः कामरूपिणः ॥

श्मशाननिलयं यस्य ऋषभो यस्य वाहनम् ।

तेजसा तस्य देवस्य शान्तिं कुर्वन्तु मे सदा ॥

ये पिशाचा महावीर्या ऋद्धिमन्तोऽमितप्रभाः ।
नानारूपधराः सर्वे च गुणवत्तराः ॥

अन्तरिक्षे पिशाचा ये स्वर्गे ये च पिशाचकाः ।
भूतले ये पिशाचाश्च बहुरूपा मनोजवाः ॥

प्। ४०(४३)

चन्द्रार्धं मस्तके यस्य यस्य भस्मविभूषणम् ।
तेजसा तस्य देवस्य शान्तिं कुर्वन्तु मे सदा ॥

अपस्मारग्रहास्सर्वे सर्वे चाविज्वरग्रहाः ।
गर्भबालग्रहा ये तु नानारोगग्रहाश्च ये ॥

अन्तरिक्षे ग्रहा ये तु स्वर्गे ये च ग्रहोत्तमाः ।
भूपाताले गृहे ये तु ये ग्रहाः सर्वतोदिशम् ॥

कण्ठं यस्य महानीलं भूषणं यस्य पन्नगम्
तेजसा तस्य देवस्य शान्तिं कुर्वन्तु मे सदा ॥

इति देवादयः सर्वे शिवज्ञानविधायिनः ।
कुर्वन्तु शान्तिं जगतः शिवभक्तेषु सर्वदा ॥

जयात्मयोगसंस्थाय जय संशुद्धबुद्धये ।
जयदानैक शूराय जयेशाय नमोऽस्तु ते ॥

जयोत्तमाय देवाय जय कल्याणकारिणे ।
जयप्रकटदेहाय जयजप्याय ते नमः ॥

जयलक्ष्मी विधानाय जयकान्ति विधायिने ।
यज वाक्यविधुष्टाया जिनाय नमो नमः ॥

जय त्रिशूलहस्ताय जयखट्वाङ्गधारिणे ।
जय निर्जितरूपाय जय रूपाय ते नमः ॥

जय कान्ताधर्देहाय जय चन्द्रार्धधारिणे ।
जय देवादिदेवाय महादेवाय ते नमः ॥

जय त्रिभुवनेशाय जय विख्यातकीर्तये ।
जय वीराय शर्वाय जय कीर्ते नमोऽस्तु ते ॥

जय निर्मलदेहाय? जय सर्वार्थकारिणे ।
जय मन्मथनाशाय शानाय नमोस्तु ते ॥

इत्येवं शान्तिकाध्यायं यः पठेच्छृणुयादपि ।
विधूयसर्वपापानि शिवलोके महीयते ॥

कन्यार्थी लभते कन्यां जयार्थी लभते जयम् ।
अर्थकामोलभेदर्थं पुत्रकामो लभेत् सुतम् ॥

विद्यार्थी लभते विद्यां योगार्थी योगमाप्नुयात् ।
गर्भिणी लभते पुत्रं कन्या विन्दति सत्पतिम् ॥

यो यं प्रार्थयते कामं मानवः श्रवणादिह ।
तत्सर्वं शीघ्रमाप्नोति देवानां च प्रियो भवेत् ॥

श्रुत्वा ध्यायमिदं पुण्यं संग्रामं प्रविशेन्नृपः ।
स विजित्यापिताञ्छत्रून् कल्याणैः परिपूर्यते ॥

अक्षयं मोदते कालमतिरस्कृतशासनः ।
व्याधिभिर्नाभिभूयेत पुत्रपौत्रप्रतिष्ठितः ॥

शान्त्यध्यायमिदं पुण्यं यदुद्दिश्यपठेन्नरः ।

पू । ४१(४४)

तस्य रोगानबाधन्ते वातपित्तादिसंभवाः ॥

नाकाले मरणं तस्य सर्वैश्चापि न दृश्यते ।
विषं नाक्रमते देहे न जडान्धत्वमूकता ॥

नोपसर्गभयं तस्य न चोत्पातभयं भवेत् ।

नाभिचारकृतो दोषः विलिप्येत कदाचन ॥

सर्वकामसमृद्धात्मा यः पठेच्च दिने दिने ।
नित्यमूर्जितसत्वः स्यादज्ञाप्यस्य निवेदनम् ॥

वरेण्यं सर्वतीर्थानां गंगादीनां समन्ततः (विशेषतः) ।
तत्पुण्यं कोटिगुणितं प्राप्नोति श्रवणादिह ॥

दशानां राजसूयानामग्निष्टोमशतस्य च ।
श्रवणात् फलमाप्नोति कोटि कोटि गुणोत्तरम् ॥

अवध्यः सर्वदेवानामन्येषाञ्च विशेषतः ।
जीवेद्वर्षशतं साग्रं सर्वव्याधिविवर्जितः ॥

गोघ्नश्चैव कृतघ्नश्च ब्रह्महा गुरुतल्पगः ।
शरणागतघाती च मित्र विस्रम्यघातकः ॥

कष्टपापसमाचारः पितृहा मातृहा तथा ।

श्रवणादस्य पापेन मुच्यते सर्वपातकैः ॥

शान्त्यध्यायमिदं पुण्यं न देयं कस्यचित् ।
दातव्यं शिवभक्तेभ्यः शिवेन कथितं पुरा ॥

सर्वकामसमृद्ध्यर्थं ये पठन्ति दिने दिने ।
तेभ्यः पुण्यमिदं देयमात्मनः शिवमिच्छता ॥

इति शिवधर्मशास्त्रे षडक्षर शिवार्चन जपोवासफलप्रकरणेन
सहशान्त्यध्यायष्षट्कः ॥

अथ सप्तमः

नन्दिकेश्वर उवाच

ये स्मरन्ति सदाकालमीशानं पूजयन्ति ये ।
रुद्रलोकात् परिभ्रष्टा विज्ञेयास्तेगणेश्वराः ॥

अग्निहोत्रं च वेदाश्च यज्ञाश्च बहुदक्षिणाः ।
शिवलिङ्गार्चनस्यैते कोट्यंशेनापि नार्हतः ॥

सदा यजति सोयज्ञैस्सदा दानं प्रयच्छति ।
सदा स वायुभक्षः स्यात् सदा यो वार्चयेच्छिवम् ॥

यः शिवं पूजयेन्नित्यं प्रणमेद्वापि भक्तितः ।
तस्य योगश्च मोक्षश्च शिवः प्रीतः प्रयच्छति ॥

यः कुर्यादर्चनं मासमेकाहारो जितेन्द्रियः ।
स यत्फलमवाप्नोति न तत् सर्वैर्महामखैः ॥

पौर्णमास्याममावास्या चतुर्दश्यष्टमी तथा (षु च) ।
स्नापयित्वाम्भसालिङ्गं सर्वयज्ञफलं लभेत् ॥

प्। ४२(४५)

कृष्णपक्षे त्रयोदश्यामुपोष्य परमेश्वरे ।
प्रातर्मध्याह्नयोः पूजां चतुर्दश्यां समाचरेत् ॥

पञ्चगव्यं सपीत्वादौ हविर्भुञ्जीतवाग्यतः।
दशानामश्वमेधानां फलं प्राप्नोति मानवः॥

पौष्यकृष्णाष्टमी योगे पूजयित्वा च शङ्करम्।
प्राप्नोति परमं स्थानं यत्र देवो महेश्वरः॥

ब्रह्मचारी शुचिर्भूत्वा त्रिसन्ध्यं योऽर्चयेच्छिवम्।
ससप्तकुलमुद्धृत्य शिवलोके महीयते॥

दानोपवासनियमैः पूजा जागरभोजनैः।
महास्नानादिविधिना शिवं पर्वसुपूजयेत्॥

यत्पर्वयावतः कालात् भवत्तत्रार्च्यशङ्करम्।
तावत्कालार्चनात्पुण्यं यत्तत्पर्वार्चनाल्लभेत्॥

तस्मात् पर्वसु यत्नेन यथाविभवविस्तरैः।
पूजनीयः शिवो नित्यं महापुण्यजिगीषया।

नैरन्तर्येणषण्मासं विधिना पूज्यशङ्करम् ॥

पुण्यं तदेव सकलं लभते विषुवार्चनात् ।
एवमेव तु विज्ञेयं ग्रहणे चोत्तरायणे ॥

दिनाच्छिद्रेषु संक्रान्तौ षडशीति मुखेषु च ।
मासैश्चतुर्भिर्यत्पुण्यं विधिना पूज्य शङ्करम् ॥

कार्तिक्यां तल्लभेत्पुण्यं पौर्णमास्यां शिवार्चनात् ।
पुण्यमेवञ्च फाल्गुन्यामाषाढयामेवमेव तु ॥

चातुर्मास्यार्चनं ह्येतत् महापुण्यफलप्रदम् ।
माघे मासे समुद्युक्तः त्रिसन्ध्यं योऽर्चयेच्छिवम् ॥

लभेत्षाण्मासिकं पुण्यं माघे नैव न संशयः ।
यथा माघे तथाषाढे मासे चैव तु कार्तिके ॥

त्रिषु पुण्यं समं ज्ञेयं मासे ह्येतेषु यत्कृतम् ।

चातुर्मास्य कृतं पुण्यं पुष्यमासार्चनाल्लभेत् ॥

चैत्रफाल्गुनयोः पुण्यं द्विमास जनितं भवेत् ।
चतुर्दश्याममावास्यां पौर्णमास्यां च पाक्षिकम् ॥

पुण्यमष्टगुणं ज्ञेयमष्टम्यां योर्चयेच्छिवम् ।
यः प्रदद्याद्गवां लक्षं दोग्ध्रीणां वेदपारगे ॥

एकाहं योऽर्चयेल्लिङ्गं तस्य पुण्यं ततोऽधिकम् ।
मासे मासे तु यो श्नीयात् यावज्जीवं सकृन्नरः ॥

यश्चार्चयेत् सकृल्लिङ्गं सममेतन्नसंशयः ।
एतेन क्रमयोगेन फलं विद्धि दिने दिने ॥

ज्ञेयं संवत्सरस्यापि यावद्यत्कालमर्चयेत् ।

पू । ४३(४६)

यः पुनस्संगमुत्सृज्य शिवमब्दं प्रपूजयेत् ॥

नैरन्तर्याच्छतगुणं तत्पुण्यं तत्प्रवर्धते ।
पञ्चाशद्गुणितं पुणमब्दार्धं योऽर्चयेच्छिवम् ॥

ऋतावृतौ तदर्धं स्यान् मासे मासे तदर्धकम् ।
मासार्धमपि यो लिङ्गं नैरन्तर्येण पूजयेत् ॥

पुरुषोत्तमः सविज्ञेयो नैरन्तर्यं हि दुष्करम् ।
प्रातरुत्थाय यो लिङ्गं भक्त्यासंपूजयेच्छिवम् ॥

कपिलानां शतं दत्वा यत्पुण्यं तदवाप्नुयात् ।
मध्यं दिनकरे प्राप्ते यो लिङ्गं प्रतिपूजयेत् ॥

संपूर्णां पृथिवीं दत्वा यत्पुण्यं तदवाप्नुयात् ।
वारुणी माश्रिते सूर्ये यः शिवं सम्यगर्चयेत् ॥

गवां शतसहस्रस्य दत्तस्य फलमाप्नुयात् ।
यो लिङ्गमर्धरात्रे तु शुचिः स्नात्वा प्रपूजयेत् ॥

अग्निष्टोमशतस्यासौ धर्मतो लभते फलम्।
एवं पर्वसु वेलाषु स्ववेलास्वपि शङ्करम्॥

संपूजयेन्नरो भक्त्या सर्वान्कामानवाप्नुयात्।
शिवलिङ्गं महापुण्यं सर्वदेवनमस्कृतम्॥

यः स्पृशेदपि वा नित्यं न स पापैः प्रलिप्यते।
न तद्भूयः प्रपश्यन्ति योनिसङ्कर संकटम्॥

क्रमान्मोक्षं गमिष्यन्ति ये नरा लिङ्गमाश्रिताः।
काञ्चनं मेरुमात्रं च सर्वां दत्वा वसुंधराम्॥

सागरानन्नपूर्णांश्च तल्लिङ्गार्चयतुः फलम्।
मेरुमन्दरमात्रोऽपि राशिः पापस्य कर्मणाम्॥

ईश्वरं वैद्यमासाद्य नश्यते दुष्टरोगवत्।
शिवार्चनरतो नित्यं महापातकसंभवैः॥

दोषैः कृतैर्नलिप्येत पद्मपत्रमिवाम्भसा।
छित्वा भित्वा च भूतानि हत्वा सर्वमिदं जगत्॥

यजेदेकं विरूपाक्षं न स पापैः प्रलिप्यते।
सर्वावस्था गतो वापि प्रयान्ति परमां गतिम् (युक्तां वा
सर्वपातकैः)॥

(शिवमिष्ट्वा नरः सोऽपि) सरित्समुद्रतीरेषु वनेषु पवनेषु च।
गिरिशृंगेषु तुङ्गेषु (गह्वरो पवनेषु च) तीर्थायतनसंश्रये॥

(पुष्करिण्यां तटाकेषु) यत्र वा रमते बुद्धिस्तत्रैव शिवमर्चयेत्।
सर्वयज्ञेषु यत्पुण्यं तल्लभेन्नात्र संशयः॥

यः पुनः स्थानसंकल्पमुत्सृज्य शिवमर्चयेत्।
सोऽश्वमेधफलं सर्वं लभते नात्र संशयः॥

सोश्वमेधफलं सर्वं लभतेनात्र संशयः ।
अयं विनापि मन्त्रेण पुण्यराशिः प्रकीर्तितः ॥

स्यादयं मन्त्रसंयुक्तं पुण्यं शतगुणाधिकम् ॥
तस्मान्मन्त्रेण शर्वाय स्नानगन्धफलादिकम् ॥

क्षितिगोरत्नवस्त्रादि होमाद्यं च निवेदयेत् ।
ज्ञेयो नमः शिवायेति मन्त्रः सार्वार्च्य साधकः ॥

सर्वमन्त्राधिकश्चायंमोंकाराद्यष्षडक्षरः ।
शिवेनान्तर्बहिर्यस्माद्व्याप्तं सर्वं चराचरम् ॥

जगदेकं च कुरुते तस्मादोमिति संस्मृतः ।
अयमर्धश्चतसृभिः मात्राभिः परिगीयते ॥

ब्रह्माहरिश्च रुद्रश्च मात्रास्ति(स्रे)स्य कीर्तिताः ।
दक्षिणांगोद्भवो ब्रह्मा हरिर्वामाङ्गसंभवः ॥

हृदयान्नीलरुद्रश्च ब्रह्मविष्णुप्रबोधकः।
जगत्सृष्टिकरो ब्रह्मा विष्णुर्लोकविमोहकः॥

जगत्सृष्टिकरो ब्रह्माविष्णुर्लोकविमोहकः।
अनुग्रहपरोनित्यन्नीलरुद्रः शिवात्मकः॥

त्रिभिरेतैर्जगद्व्याप्तं कारणैरात्मकर्मभिः।
तिस्त्रोमात्राः शिवस्यैताः सर्वलोकप्रपूजिताः॥

एता एव त्रयोलोकास्त्रयो वेदास्त्रयस्तायः।
त्रयोगुणास्त्रिवर्गश्च यच्चान्यज्जगतिस्थितम्॥

अर्धमात्रा परोरुद्रः शिवः कारणकारणम्।
तस्मादेतत्समुत्पन्नं जगतः कारणत्रयम्॥

सर्वज्ञः कारणः शुद्धो नमस्कार महामखः।
नमस्कारात्मयज्ञेन तस्मात् संपूजये च्छिवम्॥

अज्ञानमशिवत्वं स्यात् सर्वदुःखालयं यतः ।
स्वभावात्तदवाप्तं हि तस्माद्रुद्रः परः शिवः ॥

नमः शिवाय शान्ताय कारण त्रय हेतवे ।
निवेदयामि चात्मानं मत्वैकमनसा पुनः ॥

उक्त्वों नमः शिवायेति मुच्यते सर्वपातकैः ।
यस्मात्तस्मात्तदामन्त्रमोंकाराद्यमनुस्मरन् ॥

सर्वदा सर्वकार्येषु क्षुतनिष्ठिवनादिषु ।
यात्यों नमः शिवायेति शिवमुक्त्वा शिवं पदम् ॥

यः स्वपन् प्रतिबुध्यंश्च प्रयाणान्ते च स स्मरन् ।
सदों नमः शिवायेति स गच्छेत् परमांगतिम् ॥

शाठ्येनापि नमस्कारः प्रयुक्तः शूलपाणये ।
संसारस्थूलबंधानां मुद्वेष्टन करो भवेत् ॥

अपवित्रः पवित्रो वा सर्वावस्थां गतोऽपि वा।
यः स्मरेद्देवमीशानं न स पापैः प्रलिप्यते॥

स्मरणादेवरुद्रस्य पापसंघात पञ्जरम्।
शतधा भेदमायाति गिरिर्वज्रहतो यथा॥

सर्वेषां शिवभक्तानामरोषार्थं प्रसिद्धये।
मन्त्र माह शिवः सारमशेषार्थनिबन्धनम्॥

सद्बीजं सर्वविद्यानामाद्यं ब्रह्म परात्परम्।
सर्वार्थसाधकं मन्त्रं शिवसूत्रं षडक्षरम्॥

भाष्यमस्यैव सूत्रस्य सर्वज्ञानानि शम्भुना।
पश्चात् परापराणीह प्रव्यक्तं गदितानि तु॥

तस्मादनेनमन्त्रेण प्रकुर्वीत शिवार्चनम्।
सन्ध्यायां च जपेदेनं सर्वपापविशुद्धये॥

गृहाच्छतगुणं पुण्यं सन्ध्यायां च जलाशये।
शिवदक्षिणमूर्तौ तु तत्पुण्यमयुताधिकम्॥

तस्माच्छिवालये सन्ध्यामाचरेच्छान्तमानसः।
शिवमन्त्रेणसततं सर्वकामप्रसिद्धये॥

यस्तुसर्वत्रसंपूज्य सविशेषं सविस्तरम्।
अश्वमेधायुतं पुण्यं लभते नात्रसंशयः॥

सरित्समुद्रतीरेषु वनेषू पवनेषु च।
यस्तमर्चयते भक्त्या तस्य पुण्यं ततोधिकम्॥

जितेन्द्रियश्शान्तमनाश्शिवमन्त्रेण योऽर्चयेत्।
न तस्य शक्यते पुण्यं वक्तुं वर्षशतैरपि॥

गता वच्छक्यते वक्तुं यस्मिन् देशे वसेदयम्॥

सोऽपि देशो भवेत्पूतः किं पुनस्तस्य बान्धवाः।
येभ्यो यमन्नमश्नाति येस्तस्य परिचारकाः॥

तेऽपीह तत्समायस्मात् तैर्विनानशिवार्चनम्॥

न तत्र देशे दुर्भिक्षं न चमरिः प्रवर्तते।
नाकाले म्रियते राजा पूज्यते यत्र शङ्करः॥

यः शिवं पूजयेन्नित्यं मन्त्यजोऽपि जितेन्द्रियः।
एवं भावसमायुक्तस्सोऽपि गच्छेत् परांगतिम्॥

नोपनीत सहस्रेभ्यो ब्रह्मचारी विशिष्यते।
ब्रह्मचारीसहस्रेभ्यो वेदाध्यायी विशिष्यते॥

वेदाध्यायि सहस्रेभ्यो ह्यग्निहोत्री विशिष्यते।
अग्निहोत्रिसहस्रेभ्यो यज्ञयाजी विशिष्यते॥

यज्ञयाजिसहस्रेभ्यो सत्रयाजी विशिष्यते।

सत्र याजिसहस्रेभ्यः सर्वविद्यान्तपारगः ॥

प्। ४६(४९)

सर्वविद्यान्तविद्भश्च शिवभक्तो विशिष्यते ।
तस्मादेवं शिवं भक्त्याभ्यर्चयेच्छान्तमानसः ॥

शिवभक्तो जितक्रोधः शिवज्ञानपरायणः ।
मैत्रः कारुणिकोयस्तु सप्राप्नोति सदाशिवम् ॥

पुण्यप्रायेषु मैत्र्यैव मुदिता पुण्यशालिषु ।
अपुण्यवत्सु चोपेक्षा सर्वेषां च वदेच्छिवम् ॥

इत्येवं पञ्चधा चित्तं भावयित्वा यजेच्छिवम् ।
संपूज्यपशुभर्तारं प्रहृष्टेनान्तरात्मना ॥

ध्यानं कुर्याद्ययोद्दिष्टं सर्वपापनिकृन्तनम् ।
इष्ट्वा तु परयाभक्त्या भगवन्तं त्रिलोचनम् ॥

कृताञ्जलिपुटो भूत्वा स्तोत्रमेतज्जपेन्नरः।
नमस्ते ज्ञानरूपाय सर्वज्ञानैक हेतवे॥

ज्ञानविज्ञानतत्वाय नित्यं ज्ञानतमाय ते।
सूक्ष्माय सूक्ष्मरूपाय सूक्ष्मज्ञानैक हेतवे॥

सूक्ष्माणामपि सूक्ष्माय नमः सूक्ष्मतमायते।
दिव्याय दिव्यदिव्याय दिव्यरनयैकहेतवे।
दिव्यानामपि दिव्याय नमो दिव्यतमाय ते॥

पराय परमेशाय परमार्थैक हेतवे।
परापरविमुक्ताय नमः परतमाय ते॥

पूज्याय पूज्य पूज्याय सर्वपूज्यैक हेतवे।
पूज्यानामपि पूज्याय नमः पूज्यतमायते॥

नित्याय नित्यरूपाय नित्यसंभोग हेतवे।

नित्यानामपि नित्याय नमो नित्यतमायते ॥

दीप्ताय दीप्तदीप्ताय सर्वदीप्त्येक हेतवे ।
दिप्तानामपि दीप्ताय नमोदीप्ततमाद्यते ।
साराय सारभूताय सर्वसारैक हेतवे ॥

साराणामपि साराय नमः सारतमायते ।
शक्ताय शक्तिरूपाय सर्वशक्त्यैक हेतवे ॥

शक्तानामपि शक्ताय नमः शक्ततमायते ।
शुद्धाय शुद्धरूपाय सर्वशुद्ध्यैक हेतवे ॥

शुद्धानामपि शुद्धाय नमः शुद्धतमायते ।
कालाय कालरूपाय सर्वकालैक हेतवे ॥

कालानामपि कालाय नमः कालतमायते ।
सर्वमन्त्रशरीराय सर्वमन्त्रैकहेतवे ॥

मन्त्राणामपि मन्त्राय नमो मन्त्रतमायते ।

व्योमप्रमाणरूपाये शानाय नमो नमः ॥

व्योमप्रमाण योगाय पुरुषाय नमो नमः ।

व्योम प्रमाणभासाया घोराय नमो नमः ॥

पू । ४७(५०)

व्योमप्रमाणवामाय वामेशाय नमोस्तु ते ।

व्योमप्रमाणभोगाय भोगेशाय नमोस्तु ते ॥

व्योमप्रमाणमोक्षाय मोक्षेशाय नमोऽस्तुते ॥

व्योमप्रमाणविश्वाय विश्वेशाय नमोस्तु ते ॥

एककाय द्विकायाय बहुकायाय ते नमः ।

कायासंख्येय युक्ताय त्र्यम्बकाय नमो नमः ॥

एकवक्त्रद्विवक्राय बहुवक्राय ते नमः ।

वक्त्रासंख्येययुक्ताय परमेशाय ते नमः ॥

एकजिह्वद्विजिह्वाय बहुजिह्वाय ते नमः ।
जिह्वासंख्येय युक्तायत्रिणेत्राय नमो नमः ।
व्योमप्रमाणसत्याया जिताय नमो नमः ॥

व्योमप्रमाणकामाय कामेशाय नमो नमः ।
व्योमप्रमाणदिव्याय दिव्येशाय नमो नमः ॥

व्योमप्रमाणकालाय कालेशाय नमो नमः ।
व्योमप्रमाणधर्माय धर्मेशाय नमो नमः ॥

एकदंष्ट्रद्विदंष्ट्राय बहुदंष्ट्राय ते नमः ।
दंष्ट्रासंख्येय युक्ताय त्र्यम्बकाय नमो नमः ॥

एक कण्ठ द्विकण्ठाय बहुकण्ठाय ते नमः ।
कण्ठासंख्येय युक्ताय नीलकण्ठाय ते नमः ॥

एक हस्त द्विहस्ताय बहुहस्ताय ते नमः ।
हस्तासंख्येययुक्ताय नित्यं रुद्राय ते नमः ॥

एकनेत्रद्विनेत्राय बहुनेत्राय ते नमः ।
नेत्रासंख्येय युक्ताये शानाय नमोऽस्तु ते ॥

नमस्तेऽस्तु महादेव नमस्तेऽस्तु महेश्वर ।
नमस्तेस्तु महायोगिन् नमस्तेस्तु महाबल ॥

नमस्तेस्तु महेशाय नमस्तेऽस्तु महोत्तम ।
नमस्तेऽस्तु महारूप नमस्तेऽस्तु सदाशिव ॥

नमस्तेऽस्तु महाशुद्ध नमस्तेऽस्तु सदोज्ज्वल ।
नमस्तेस्तु महादेव नमस्तेऽस्तु सदा भव ॥

नमस्ते भगवन् शान्त नमस्ते भगवन् ध्रुव ।
नमस्ते भगवद्दीप्त नमस्ते भगवन् हर ॥

अजिताय नमस्तुभ्यं भस्मांगाय नमोस्तु ते ।
सर्वात्मने नमस्तुभ्यं विश्वेशाय नमोस्तु ते ॥

सर्वज्ञाय नमस्तुभ्यं सर्वांभाय नमोस्तु ते ।
अनन्ताय नमस्तुभ्यमनाथाय नमो नमः(स्तु ते) ॥

पू। ४८(५१)

अव्यक्ताय नमस्तुभ्यं शाश्वताय नमोस्तु ते ।
संपूज्याय नमस्तुभ्यं वरदाय नमोस्तु ते ॥

इति स्तवे न यः कश्चित् संस्तुनोति महेश्वरम् ।
स विहायाशु पापानि रुद्रलोके महीयते ॥

भोगार्थी लभते भागान् राज्यार्थी राज्यमाप्नुयात् ।
कन्यार्थी लभते कन्यां योगार्थी योगमाप्नुयात् ॥

मुच्यते व्याधिभी रोगी दुःखी दुःखात् प्रमुच्यते ।
बन्धनान्मुच्यते बद्धो यशोर्थी कीर्तिमाप्नुयात् ॥

यान् यान् चिन्तयते कामांस्तांस्तान् प्राप्नोति भावितः ।
शैवं पदमवाप्नोति नित्यं पठति यो नरः ॥

इति श्रीशिवधर्मशास्त्रे दानधर्मोध्यायः सप्तमः ॥

अथाष्टमः

श्रीनन्दिकेश्वर उवाच

पृथिव्यां यानितीर्थानि पुण्यान्यायतनानि च ।
लीयन्ते तानि लिङ्गे तु तस्माल्लिङ्गं समर्चयेत् ॥

स स्नातस्सर्वतीर्थेषु स सर्वोपरिसंस्थितः ।
यः पूजयेन्महापुण्यं लिङ्गं सर्वार्थसिद्धिदम् ॥

शतेन स्थापितं लिङ्गं सहस्रेण न चालयेत् ।
दुःस्थितं सुस्थितं वापि शिवलिङ्गं न चालयेत् ॥

घृताभिषेकं यः कुर्यात् अहोरात्रं शिवस्य तु।
सूक्ष्मद्वारेण कुम्भेन पुष्यमासे समुद्यतः॥

गीतनृत्तोपचारेण शंखवादित्र निस्वनैः।
कुर्याज्जागरणं चात्र प्रदीपाद्युपशोभितम्॥

समस्तपापनिर्मुक्तः समस्तकुलसंयुतः।
समस्तकामसंपूर्णः समस्तगुणसंयुतः॥

ज्वलद्भिस्समहायानैरसंख्येयैरनुत्तमैः।
युक्तः शिवपुरे नित्यं मोदते शिववत् सुखी॥

ग्रहणे विषुवे चैव पुण्येषु दिवसेषु च।
घृताभिषेकं यः कुर्यान्महापुण्यमवाप्नुयात्॥

घृताभिषेकं यः पश्येदासमाप्ते रूपोषितः।
विधूयसर्वपापानि शिवलोकं सगच्छति॥

एकः पूजयते भक्त्या भक्त्या चान्यः प्रपश्यति ।
तुल्यमेवफलं ताभ्यां भक्तिरेवात्रकारणम् ॥

यः कुर्यात्पर्वकालेषु महायात्राप्रवर्तनम् ।
शिवस्य रथयात्रां वा नगरान्तः प्रदक्षिणम् ॥

महाचित्रध्वजैश्छत्रैः किंकिणीखनान्वितैः ।
वितानध्वजमालाभिः घण्टाचामरदर्पणैः ॥

प्। ४९(५२)

शंखभेर्यादितुमुलैः गीतनाट्यादिसंकुलैः ।
लेख्यैर्दारुमयैर्यन्त्रैर्मातृरक्षोगणादिभिः ॥

उद्गाग्नेययन्त्रैश्च बह्वाश्वर्यैरनेकशः ।
स्त्रीडोलायन्त्रचक्रैश्च महाचक्राष्टलम्बनैः ॥

उद्ध्यापानखाताद्यै महासत्रसमायुतम् ।

महाजनपदाकीर्णं यथाविभवविस्तरम् ॥

सर्वदानप्रपुण्यानि सर्वयज्ञफलानि च ।
अत्युग्रतपसां पुण्यं सर्वतीर्थफलानि च ॥

लब्ध्वानखरः श्रीमान् शिवयात्रा प्रवर्तनात् ।
शिवलोके महाभोगैः शिववन्मोदतेचिरम् ॥

तस्यान्ते देवराजत्वं सुचिरं कालमाप्नुयात् ।
जम्बूद्वीपाधिपः श्रीमान् तस्यान्ते स महीपतिः ।

आलिङ्गवेदिपर्यन्तं यो दद्याद् घृतकम्बलम् ।
घृतधाराफलं तस्य माघे पौर्णे तु पर्वणि ॥

मन्वन्तरशतं साग्रं शिवलोके महीयते ।
सम्यक् प्रोक्षणकं कृत्वा शिवलोकमवाप्नुयात् ।
सुरूपः सुभगश्श्रीमान् परिभ्रष्टोऽत्र जायते ॥

रूपं पिष्टमयं कृत्वा त्रिणेत्रं रत्नभूषितम्।
श्रुत्वोपवीतसंयुक्तमेकपादं विशेषतः।
दन्तेषु मौक्तिकं तस्य प्रवालमधरोष्ठयोः॥

दद्याद्वज्रं च नेत्राभ्यां वैडूर्यं वाप्यसंभवे॥

हेमं रौप्यं च हस्ताभ्यां ताम्रं पादे प्रकल्पयेत्।
अण्डजैः फेनजैर्वस्त्रैर्विचित्रैः परिवेष्टयेत्॥

सुगन्धैश्चित्रवर्णैश्च पुष्पैरपि विभूषयेत्।
विविधैः भक्ष्यभोज्याद्यैः बलिं तत्रोपकल्पयेत्॥

भोजयेच्छिवभक्तांश्च विप्रान् भक्त्या च तर्पयेत्।
प्रीयतां मे शिवो नित्यमुक्त्वा चोत्थापयेद् द्विजान्॥

तैरेवसान्द्रं विप्रेन्द्रैस्तद्रूपन्तु शिवालये।
नीत्वा समर्चयेद्वेद्यां शिवलिङ्गसमीपतः॥

सर्वयज्ञफलं प्राप्य सर्वदानफलानि च ।
सुरूपो रूपदानेन शिवलोके महीयते ॥

भोजनं घृतसंपूर्णं मधुनोपरिशोभितम् ।
दद्यात् कृष्णतिलानां च प्रस्थमेकं च मागधम् ॥

द्विगुणं तण्डुलानाञ्च पृथक्प्रस्थन्तु दापयेत् ।
गन्धैः पुष्पैस्तथा धूपैः नववस्त्रैश्च वेष्टयेत् ॥

सर्वभक्षान्नपानैश्च बलिं चैव निवेदयेत् ।

पृ । ५०(५३)

अर्चयित्वा विधानेन पौर्णमास्यां विशेषतः ।
युगायुतसहस्राणि शिवलोकेमहीयते ॥

पुण्यक्षयादिहागत्य समृद्धे जायते कुले ।
मेधावी सुभगः श्रीमान् वेदवेदांगपारगः ।
ताम्रपात्रं पयः पूर्णं कृत्वा चान्तःस्थकाञ्चनम् ॥

प्रच्छाद्योपरिपद्मेन गन्धपुष्पार्चितं महत् ।
शिवभक्तं द्विजं सम्यक् भोजयित्वा विधानतः ॥

प्राच्यां समुद्गते सोमे प्रतीच्यां च रवौगते ।
पौर्णमास्यां सवैशाख्यां गृह्यपात्रं शिवाग्रतः ॥

प्रीयतां मे महादेवः सोममूर्तिर्जगत्पतिः ।
तस्मैविप्रायतत्पात्रं मर्पयेद्भक्तितश्शनैः ॥

एतत्सोमव्रतं नाम कृत्वा रुद्रान्तिकं व्रजेत् ।
रुद्रलोकात्परिभ्रष्टो भवेज्जातिस्मरोनरः ।
पूर्वाभ्यासेन ते नैव पुनः शिवपुरं व्रजेत् ॥

आषाढे पौर्णमास्यां तु शिवं संपूज्य यत्नतः(भक्तितः) ।
उपवीतीसितादद्यात् शिवभक्तांश्च भोजयेत् ॥

पुनरेव च कार्तिक्यां पूज्यशंभुं क्षमापयेत् ।

यतीनां दक्षिणां दद्यात् सूत्रवस्त्रादिशोभिताम् ॥

यः कुर्यात् सकृदप्येवं चातुर्मास्य पवित्रकम् ।
कल्पकोटिशतंसाग्रं शिवलोके महीयते ॥

पुण्यक्षयात्परिभ्रष्टश्चतुर्वेदी प्रजायते ।
इच्छया वा भवेद्राजा गुणवीर्यसमन्वितः ॥

भूमिदानस्य यत्पुण्यं कन्यादानस्य यत्फलम् ।
मुखवाद्येन तत्पुण्यमुभयं लभते नरः ॥

तदेव पुण्यगीतस्य नृत्तस्य च विशेषतः ।
तदेव जयशब्दस्य हस्ततालस्वने तथा ॥

योगां पयस्विनीं दद्यात् तरुणीं वृषसंयुताम् ।
शिवाय तेन दत्तं स्यात् जगत्सर्वं चराचरम् ॥

वृषभं परिपूर्णांगमुदारञ्च शशिप्रभम् ।

गोमतीं धूर्वहं वापि यथेष्टं विनिवेदयेत् ॥

यावन्ति देहरोमाणि तत्प्रसूति कुलेषु च ।
तावन्मृगसहस्राणि शिवलोके महीयते ॥

स्नानाग्निकार्यमुद्दिश्य सुरूपां सुपयस्विनीम् ।
कुलीनां कपिलां दत्वा दत्तं भवति गोशतम् ॥

भयकान्तार दुर्गेभ्यः कपिलात्रातिमातृवत् ।
यत्नेन कपिलां तस्मात् शिवाय विनिवेदयेत् ॥

पू । ५१(५४)

शिवस्नानादिकार्यार्थमुत्पन्नं कपिलाघृतम् ।
तस्मात्तत्रैवसंयोज्य कपिलाशुभमिच्छता ॥

कपिलां यः पिबेच्छूद्रः शिवसंस्कारवर्जितः ।
सप्रयाति महाघोरं नरकं यातनाकुलम् ।
हुतशेषं पिबेद्विप्रः स्वर्गास्यादन्यथा पशुः ॥

गाञ्च लभ्यनमस्कृत्य यः कुर्यात्तां प्रदक्षिणम्।
प्रदक्षिणी कृता तेन सप्तद्वीपावसुन्धरा॥

गवां हुंकारशब्देन दर्शनस्पर्शनेन च।
पापं प्रणश्यते यस्मात् पश्येत् स्पृशेत च ताम्॥

कुतस्तेषां हि पापानि येषां गृहमलङ्कृतम्॥

सततं बालवत्साभिर्गोभिः श्रीरिभिरिवस्वयम्।
यानि तीर्थानि मेदिन्यामासमुद्रात् समन्ततः॥

गवां शृङ्गोदकस्नानात् कलां नार्हति षोडशीम्।
गवामस्थिनलंघेत * * मृतं न वर्जयेत्॥

यावत् पिबति तद्गन्धं तावत् पुण्यैः प्रपूर्यते।
गवां कण्डूयनाद्धूपात् गो प्रदान फलं लभेत्॥

तुल्यं गो शतदानेन भयरोगादिपालनम् ।
तृणोदकादि संयुक्तं यः प्रदद्याद्गवादिकम् ॥

स गोमेधसमं पुण्यं लभते नात्र संशयः ।
बहुनात्र किमुक्तेन गावः पाल्याः प्रयत्नतः ॥

गावो दैन्यात् सदारक्ष्याः पोष्याग्राह्याश्च सर्वदा ।
ये ताडयन्ति ते पापाः सर्वलोकस्यमातरः ॥

क्रोशयन्ति च संमोहात् तैराकृष्टमिदं जगत् ।
ताडयेद्यदि वा मर्त्यो यश्चाक्रोशेन्नराधमः ॥

नरकाग्नौ स पच्येत गोनिश्वाससमीरिते ।
सपलाशेन दग्धेन तनुनाशं निवर्तयेत् ॥

गच्छां वेति च तां ब्रूयात् मा मातरितिवारयेत् ।
हलोत्सर्गं च यः कुर्यात् पक्षयोरुभयोरपि ॥

द्वादश्यां पञ्चदश्यां च चतुर्दश्यष्टमीषु च ।
तस्य गावो वृषाविष्ण शिवोमाः सर्वदेवताः ॥

शान्तिं जुषन्ति सुप्रीताः स्वर्गमायुर्बलं श्रियम् ।
दास्यन्ति च सदा नित्यं कल्याणं भद्रमेव च ॥

एवं यो वर्तते गोषु ताडनाक्रोशवर्जितः ।
महतीं श्रियमाप्नोति रुद्रलोकं स गच्छति ॥

गो ब्राह्मणार्थमुद्युक्तः प्राणैर्यदि वियुज्यते ।

पू । ५२(५५)

प्राप्नोति परमं स्थानं यत्र देवो महेश्वरः ॥

ब्राह्मणांश्चैव गावश्च कुलमेकं द्विधाकृतम् ।
एकत्रमन्त्रास्तिष्ठन्ति हविरेकत्र तिष्ठति ।
गोभिर्यज्ञाः प्रवर्तन्ते गोषु देवाः प्रतिष्ठिताः ॥

गोभिर्वेदास्समुत्तीर्णाः सषडंगपदक्रमाः।
शृंगमूले गवां नित्यं ब्रह्माविष्णुश्च संस्थितौ।

शृंगाग्रे सर्वतीर्थानि स्थावराणि चराणि च।
शिरोमध्ये महादेवः सर्वदेवपतिः स्थितः॥

ललाटाग्रे स्थिता देवी नासावंशेषु षण्मुखः।
कम्बलाश्वतरौनागौ नासापुटसमाश्रितौ॥

कर्णयोरश्विनौ देवौ चक्षुषी राशिभास्करौ।
दन्तेषु वायवः सर्वे जिह्वायां वरुणः स्थितः॥

सरस्वती च हुंकारे यमयक्षौ तु गण्डयोः।
सन्ध्याद्वयं तथोष्ठाभ्यां ग्रीवामिन्द्रः समाश्रितः॥

ऋक्षाणि ककुदिद्यौश्च साध्यश्चोरस्त्रिसंस्थितः।
चतुष्पात् सकलो धर्मः स्वयं जंघासुसंस्थितः॥

रुद्रैकादशकं पृष्ठे वसवः सन्धिषु स्थिताः।
खुरमध्येषु गन्धर्वाः खुराग्रेषु च पन्नगाः॥

खुराणां पश्चिमाग्रेषु गणोह्यप्ससां स्थितः।
रुद्रैकादशकं पृष्ठे वसवः सन्धिषु स्थिताः॥

श्रोणीतटस्थाः पितरो मातरो योनिमाश्रिताः।
आदित्यारश्मयो वालाः पिण्डीभूता व्यवस्थिताः॥

उदाने पृथिवी सर्वा स शैलवनकानना।
साक्षाद् गंगा च गोमूत्रे गोमये यमुना स्थिता।
अष्टाविंशद्देव कोट्यो रोमकूपेषु संस्थिताः॥

चत्वारः सागराः पूर्णाः गवां ये च पयोधराः।
एतद्वः कथितं सर्वं यथा गोषुप्रतिष्ठितम्॥

गोषुदत्तं हुतं भुक्तं गोषु सर्वं चराचरम्।
तस्माद् गावो न हिंस्याः स्युः पालनीयास्तु सर्वदा।

गावः स्तुत्याश्च वन्द्याश्च गावो मां पान्तु नित्यशः ॥

ब्रह्मणा ब्रह्मशब्देन स्तूयते प्रणवेन यः ।
स शिवः शाश्वतो नित्यं गोषुमारिं व्यपोहति(तु) ॥

योर्च्यते सततं भक्त्या विष्णुना प्रभविष्णुना ।
स शिवः शाश्वतो देवो गोषुमारीं व्यपोहतु ॥

लम्बोदरेण देवेन गजवक्त्रेण योर्चितः ।

पू । ५३(५६)

स शिवः शास्वतो देवो गोषुमारिं व्यपोहतु ॥

सर्वरोगहरेणापि रविणा यः प्रपूज्यते ।
स शिवः शाश्वतो देवो गोषुमारीं व्यपोहतु ॥

श्रीमान् यो रुचिरांगेण घण्टाकर्णगणेन यः ।
नित्यं प्रणम्यते भक्त्या हृष्टे नानन्यचेतसा ॥

स शिवः शाश्वतो देवो गोषुमारीं व्यपोहतु ।
इत्युपद्रवसंयुक्तां गोषुमारीं व्यपोहतु ॥

नित्यं रुद्रबलोपेतो रुद्रशक्ति समन्वितः ।
घण्टाकर्णगणो देवो गोषुमारिं व्यपोहतु ॥

घण्टाकर्णगणोदेवश्शिवज्ञानविधायकः ।
शिवतेजोनुभावेन गोषुमारीं व्यपोहतु ॥

शिवाय देवदेवाय महादेवाय भामिने ।
रुद्राय स्थाणवे नित्यं हरायोग्राय ते नमः ॥

परमेशाय सिद्धाय सर्वसिद्धिप्रदायिने ।
त्र्यम्बकाय महेशायातिशान्ताय ते नमः ॥

अभिमन्त्र्यसदातोयमेतैर्मन्त्रैर्यथाक्रमम् ।
प्रोक्षयीत गवां देहं ततश्शान्तिर्भविष्यति ॥

इमां यः पठते गोषु रोगार्तासु विशेषतः।
गो सावित्रीं महापुण्यां ततः शान्तिर्भविष्यति॥

यः समुत्थाय सततं गो सावित्रीमिमां पठेत्।
गवां चोत्सर्गकाले तु प्रस्थाने वा समागमे।
आयुष्मान् बलवाञ्छ्रीमान् गोमानर्थपतिर्भवेत्॥

दोहान्ते च शिवस्थानं स गच्छेन्नात्रसंशयः।
प्रभूततोयंषु बृहत्तृणेषुसपुंगवान्नित्यमरोगवत्साः।
चरन्तु गावः सुखिता वनेषुक्षीरं प्रयच्छन्तु सुखं स्वपन्तु॥

यो लंकृत्यशिवायाश्च मुत्तमां विनिवेदयेत्।
सोश्वमेधस्य यज्ञस्य फलमष्टगुणं लभेत्॥

सुविनीतां स्त्रियं वापि पुरुषं वा निवेदयेत्।
नरमेधस्य यज्ञस्य फलं षड्गुणमाप्नुयात्॥

निवेदयी तयो भक्त्या भद्रन्नागमलंकृतम्।
शिवायपर्वे दिवसे तस्य पुण्यफलं शृणु॥

मत्तैरैरावतप्रख्यैः गजैर्युक्तैः सुशोभनैः।
क्रीडते स महायानैः शतसंख्यैरनेकधा॥

कल्पकोटिसहस्राणि कल्पकोट्य युतानि च।
रुद्रलोके ततश्चान्ते भवेदिन्द्रः सुराधिपः॥

पू। ५४(५७)

भवेदिन्द्रसमः श्रीमान् रूपवीर्यबलान्वितः।
यः शिवायजलोपेतां सर्वसस्य प्ररोहिणीम्।
महीं महीपतिर्दद्यात् तस्य पुण्यफलं शृणु॥

यावद्दण्डा भवेद्भूमिर्मीयमानासमन्ततः।
तावत्सकल्पसंख्यानं रुद्रलोके महीयते॥

एवं सर्वत्रविज्ञेयं फलं दण्ड प्रमाणतः।

ग्राम खेटपुरक्षेत्र विषयादि निवेदयेत् ॥

सर्वसस्यफलोपेतं सर्वबाधाविवर्जितम् ।
ग्रामं शिवाय यो दद्यात् तस्य पुण्यफलं शृणु ॥

सर्वतीर्थेषु यत् पुण्यं सर्वयज्ञेषु यत्फलम् ।
सर्वदानेषु यत्पुण्यं ग्रामदानेन तद्भवेत् ॥

सूर्यकोटिप्रतीकाशैर्दिव्यस्त्रीकोटिसंयुतै ॥

युगकोटिशतानीकैः सर्वकामसमन्वितैः ॥

विमानैग्रामदानेन त्रिसप्तकुलसंयुतः ।
यथेष्टमैश्वरे लोके क्रीडते कालमक्षयम् ।
पुण्यं नगरदानस्य ग्रामदानाच्छताधिकम् ।
देशदानेन चानन्त्यं न शक्यं तत्प्रकीर्तितुम् ॥

रत्नान्नपानगोश्वद्रिं सर्वं भूमौ प्रजायते ।

तस्मात् तु भूमिदानेन सर्वदानफलं लभेत्।
योन्यदत्तां स्वदत्तां वा हरेद् भूमिं तु मानवः।
प्रपच्यतेऽक्षयं कालं नरकेषु क्रमेण सः॥

सर्वन्तु भूमिहारेण हृतमेव न संशयः।
भूमिहर्ता भवेत्तस्मानरकेष्वामहीक्षयात्॥

देवस्वानिहरन्तीह नरानरकनिर्भयाः।
ब्रह्मस्वानि च ये मोहात् पच्यन्ते नरकेषु ते॥

देव ब्रह्मस्व पुष्टानि वाहनानि महीपतेः।
युद्धकाले नारीष्यन्ते सैकताः सेतवो यथा॥

भूमिप्रदो वसेत् स्वर्गे यावत्कालं च संख्यया।
तस्माच्छतगुणं कालं तद्धृत्वा नरके वसेत्॥

विंशत्यष्टौ च याः कोट्यो नरकाणां सुदारुणाः।
क्रमेण तेषु पच्यन्ते देव ब्रह्मस्व हारिणः॥

कालान्तेषु समुत्तीर्णा वृक्षकीटादियोनिषु ।

भ्रमन्ति सुचिरं कालं क्षुत्पिपासादिपीडिताः ॥

एवं भ्रमन्ति सुचिरं ईश्वरायोपजीविताः ।

पू । ५५(५८)

केनचिच्छिवभक्तेन शिवार्चायतनादिषु ।

ततो विधूतपात्मानस्तेनराश्शिवतेजसा ॥

दिवं प्रयान्ति संत्यज्य शरीरं यातनात्मकम् ॥

इति श्रीशिवधर्मशास्त्रे शिवप्रदानफलोऽष्टमः ॥

अथ नवमः ॥

श्रीनन्दिकेश्वर उवाच

अतः परमिदं पुण्यं वक्ष्यामि मुनिसत्तम ।
पुण्यातिशयसंयुक्तं सर्वदैवैरनुष्ठितम् ॥

(वरुणादित्यसोमाग्नि मरुद्धनदनारदैः ।)

विष्णुना ब्रह्मणादेव्या स्कन्देन्द्राभ्यां यमेन च ।
वरुणादित्यसोमाग्नि मरुद्धनदनारदैः ॥

धर्मश्रीशुक्रनक्षत्र विलोपीतं शनैश्चरैः ।
विश्वामित्र वसिष्ठात्रिबृहस्पति बुधादिभिः ॥

श्वेतागस्त्यदधीचाद्यैस्सर्वैश्च मुनिपुङ्गवैः ।
भृङ्गिमातृमहाकाल चण्डेश्वरगणाधिपैः ॥

वृषवासुकि कार्कोट गुलकानन्ततक्षकैः ।
पद्मशङ्खमहापद्मैरन्यैश्चापि महोरगैः ॥

सिद्धैर्यक्षैः किं पुरुषैर्वसुभिश्च महात्मभिः ।
अप्सरो दैत्यगन्धर्व रक्षोभूतगणैरपि ॥

शिवागतिर्यथा प्राप्ता सर्वगत्यतिशायिनी ।
मया चेशप्रसादेन तथा शृणु विधिं परम् ॥

सितचन्दनतोयेन स्नाप्यलिङ्गं प्रलीप्य च ।
श्वेतैर्विकसितैः पद्मैः संपूज्य प्रणिपत्य च ॥

पङ्कजैर्विमलैः सौम्यै विच्छिद्रे पुष्पिते सिते ।
मध्येकेसरजालस्य स्थाप्यलिङ्गं कनीयसम् ।
अङ्गुष्ठमात्रं विधिवत् सर्वगन्धमयं शुभम् ॥

स्थाप्य दक्षिणमूर्तौ तु बिल्वपत्रैस्तदर्चयेत् ।
अगरुं दक्षिणे पार्श्वे पश्चिमे तु मनः शिलाम् ।
उत्तरे चन्दनं दद्यात् हरितालं च पूर्वतः ॥

कुसुमैश्च सुगन्धैश्च विचित्रैश्चापि पूजयेत् ।
धूपं कृष्णागरुं दत्वा सघृतं वापि गुग्गुलुम् ॥

वासांसि च सुसूक्ष्माणि विकेशानि निवेदयेत्।
पायसं घृतसंयुक्तं घृतधीपांश्च दापयेत्॥

सर्वं निवेद्यमन्त्रेण ततो गच्छेत् प्रदक्षिणम्।
प्रणम्य मूर्ध्ना देवेश मुत्यायान्ते क्षमापयेत्।
सर्वोपहारसंयुक्तं तच्चलिंगं निवेदयेत्॥

शिवाय शिवमन्त्रेण दक्षिणामूर्तिमाश्रितः॥

पू। ५६(५९)

अनेन विधिनादेवाः सर्वे देवत्वमागताः।
देवी देवत्वमापन्ना गुहः स्कन्दत्वमागतः॥

ब्रह्मा ब्रह्मत्वमापन्नो हरिर्विष्णुत्वमागतः।
एवं योऽर्चयते नित्यं लिंगं सर्वगन्धमयं सकृत्॥

सर्वपापविनिर्मुक्तः शिवलोके महीयते॥

एतद्व्रतोत्तमं गुह्यं शिवलिङ्गमहाव्रतम्॥

भक्तस्य ते समाख्यातं न देयं यस्य कस्यचित्।
चिरपर्युषितं माल्यं शिवस्यो(स्या)पनयेत्तु यः॥

गो सहस्र प्रदानस्य फलं तस्य न संशयः॥

इति श्रीशिवधर्मशास्त्रे लिङ्गमहाव्रतं नाम नवमोध्यायः॥

दशमोध्यायः

नन्दिकेश्वर उवाच

चतुर्दश्यां तथाष्टम्यां पक्षयोः शुक्लकृष्णयोः।
योऽब्दमेकं न भुञ्जीत शिवार्चनरतः शुचिः॥

यत् पुण्यमक्षयं प्रोक्तं सततं रात्रयाजिनाम्।
सत्यादिषु च यत्पुण्यं यत्पुण्यमृतुगामिनाम्।

अग्निहेत्रे तु यत् पुण्यं यत् पुण्यं यज्ञयाजिनाम् ॥

तत्पुण्यं सकलं तस्य शिवलोकं च गच्छति ।
पृथिवीं भाजनं कृत्वा भुक्त्वा पर्वसु यत्नतः ॥

अहोरात्रेण चैकेन त्रिरात्रफलमश्नुते ।
द्वेपञ्चम्यौ तु मासस्य द्वे च पर्तिपदौ नरः ॥

सोपवासः सुगन्धश्च शयीत प्रियया सह ।
शेते निश्चल चित्तश्च रति प्रीति विवर्जितः ॥

शिवानु स्मृतिशीलश्च तस्य पुण्यफलं शृणु ।
दिव्यवर्षसहस्रं तु दिव्य वर्षशतं तथा ॥

तपस्तप्तं महत्तेन भवेदेवमसंशयः ॥

शिवभक्ति सुप्रीतात्मा यद्यपि स्यात् सपापकृत् ।
शिवलोके वसेन्नित्यं शिववत्संवृतोगणैः ॥

कृष्णाष्टम्यां तु नक्तेन या च कृष्णाचतुर्दशी ।
इह भोगमवाप्नोति परत्र च शिवां गतिम् ॥

योऽब्दमेकं प्रकुर्वीत नक्तं पर्वसु पर्वसु ।
ब्रह्मचारी जितक्रोधश्शिवार्चाजपतत्परः ॥

संवत्सरान्ते विप्रेन्द्रान् शिवभक्तान् समाधिना ।
भोजयित्वा ततो ब्रूयात् प्रीयतां भगवाञ्छिवः ॥

भोजयेद्यस्तु विद्वांसं कपालव्रतधारिणम् ।
भोजितास्तेन देवेश ब्रह्मविष्णुमहेश्वराः ॥

कपालपूर्णमशनं भैक्षं यो यस्य गृह्णते ।
कुलं तस्योद्धरत्येव दशपूर्वान् दशावरान् ॥

पू । ५७(६०)

पादार्घ्याचमनीयानि गन्धपुष्पैः समन्ततः ।

अर्चयेद्भूतिनं दृष्ट्वा पश्चाद्भैक्षेण तर्पयेत् ॥

पूजितैस्तैश्शिवः साक्षात् पूजितो नात्र संशयः ।
अवमतैरवमतः स्यात् स्वयं वै परमेश्वरः ॥

श्र(शु)द्धया परयायुक्ता कपाले यत्प्रयच्छति ।
तत् तस्य फलते दानं व्रजेच्छतसहस्रधा ॥

एवं विधिसमायुक्तः शिवलोकं स गच्छति ।
न च मानुष्यकं लोकमध्रुवं प्राप्नुयान्नरः ॥

उपवासात् परं भैक्षं भैक्षात्परमयाचितम् ।
अयाचितात् परं नक्तं तस्मान्नक्तेन वर्तयेत् ॥

दैवैर्भक्तन्तु पूर्वाह्णे मध्याह्णे मुनिभिस्तथा ।
अपराह्णे तु पितृभिः सन्ध्यायां गुह्यकादिभिः ॥

सर्ववेलामतिक्रम्य नक्तमुत्तम भोजनम् ।

वामाचारो महादेवो नक्तेनोद्धरते नृणाम्॥

हविष्यं भोजनं स्नानं सत्यमाहारलंघनम्।
अग्निकार्यमधश्शय्यान्नक्तभोजीसमाचरेत्॥

कृष्णाष्टम्यां प्रयत्नेन कृत्वा नक्तं विधानतः।
मार्गशीर्षस्य मासस्य शङ्करं ह्येवमर्चयेत्॥

पित्वा शक्त्या तु गोमूत्रमनाहारो निशिस्वपेत्।
अतिरात्रस्य यज्ञस्य फलमष्टगुणं लभेत्॥

माघे माहेश्वरं नाम कृष्णाष्टम्यां प्रपूजयेत्।
निशिपीत्वा च गोक्षीरं गोमेधाष्टकमाप्नुयात्॥

एवं पौष्ये च संपूज्य शम्भुनामानमीश्वरम्।
कृष्णाष्टम्यां घृतं प्राश्य वाजपेयाष्टकं लभेत्॥

निशि पीत्वा च गोक्षीरं गोमेधाष्टकमाप्नुयात्।

फाल्गुने च महादेवं संपूज्य प्राशयेत्तिलान्॥

राजसूयस्य यज्ञस्य फलमष्टगुणं लभेत्।
चैत्रे च स्थाणु नामानं कृष्णाष्टम्यां प्रपूजयेत्॥

यवांश्च भर्जितान् प्राश्य सोऽश्वमेधाष्टकं लभेत्।
वैशाखे शिवनामानमिष्ट्वा रात्रौ कुशोदकम्।
पीत्वा पुरुषमेधस्य फलमष्टगुणं लभेत्॥

ज्येष्ठे पशुपतिं पूज्य गवां शृङ्गोदकं पिबेत्।
गवां लक्षप्रदानस्य यत्फलं तदवाप्नुयात्॥

आषाढे चोग्रनामानमिष्ट्वा प्राश्य च गोमयम्।
सौत्रामणेस्तु यज्ञस्य फलमष्टगुणं लभेत्।
श्रावणे शर्वनामानमिष्ट्वार्कान्निशि भक्षयेत्॥

पू। ५८(६१)

वर्षकोटिशतं दिव्यं रुद्रलोके महीयते।

मासे भाद्रपदेऽष्टम्यामीश्वरं नाम पूजयेत्॥

गन्धपुष्पैस्तु रात्रौ तु पीत्वा वै तण्डुलोदकम्।
पौण्डरीकस्य यज्ञस्य फलमष्टगुणं लभेत्॥

कार्तिके रुद्रनामानं संपूज्य प्राशयेद्दधि।
अग्निष्टोमस्य यज्ञस्य फलमष्टगुणं लभेत्॥

वर्षान्ते भोजयेद्विप्रान् शिवभक्तिपरायणान्।
पायसे घृतसंयुक्तं मधुनासुपरिप्लुतम्॥

शक्त्या हिरण्यं वासांसि भक्त्यातेभ्यो निवेदयेत्।
निवेदयीत रुद्राय गां च कृष्णां पयस्विनीम्॥

वर्षमेकं चरेदेवं नैरन्तर्येण यो नरः।
कृष्णाष्टमीव्रतं नाम तस्य पुण्यफलं शृणु।
सर्वपापविनिर्मुक्तः सर्वैश्वर्य समन्वितः॥

वसेच्छिवपुरे नित्यं नेहयाति कदाचन ।
पुण्येष्वेवं हि सर्वेषु विषुवग्रहणादिषु ॥

दानोपवासहोमाद्य भक्षयं जायते कृतम् ।
प्रतिमासं प्रवक्ष्यामि सिव व्रतमनुत्तमम् ॥

धर्मार्थकाममोक्षार्थं नरनार्यादि देहिनाम् ।
पुष्यमासे तु संप्राप्ते यः कुर्यान्नक्तभोजनम् ।
जितेन्द्रियः सत्यवादी शालिगोधूमगोरसैः ॥

पर्वयोरष्टमीं तस्मादुपवासेन यापयेत् ।
त्रिसन्ध्यमर्चयेदीशमग्निकार्यञ्च भक्तितः ॥

भूमिशय्या च मासान्ते पौर्णमास्यां घृतादिभिः ।
कृत्वास्नानं महापूजां शिवमन्त्रैः प्रकल्पयेत् ॥

नैवेद्यं यावकप्रस्थं क्षीरं सिद्धं निवेदयेत् ।
भोजयेच्च द्विजानष्टौ शिवभक्तान् सदक्षिणम् ॥

दद्याच्छिवायमिथुनं कपिलां वा निवेदयेत्।

अलङ्कृतां सुरूपाञ्च तस्य पुण्यफलं शृणु॥

सूर्यकोटिप्रतीकाशैर्विमानैस्सार्वका(गा)मिकैः।

रुद्रकन्यासमाकीर्णैर्महावृषभसंयुतैः॥

सङ्गीत नृत्तवाद्यैश्चाप्सरोगणशोभितैः(भिः)।

दोधूयमानश्चमरैः स्तूयमानः सुरासुरैः॥

त्रिणेत्रः शूलपाणिश्च शिवैश्वर्यसमन्वितः।

या या च्छिवपुरं दिव्यं यत्रास्ते शङ्करः स्वयम्॥

यावत्तद्रोमसंख्यानं तत्प्रसूतिकुलेषु च।

तावद्युगसहस्राणि सुखी शिवपुरे वसेत्॥

पू। ५९(६२)

एकविंशत्कुलैः सार्धं भोगान् भुक्त्वायथेप्सितान्।

ज्ञानयोगं समासाद्य तत्रैव सविमुच्यते ॥

योगाद्दुःखान्तमाप्नोति ज्ञानाद्योगः प्रवर्तते ।
शिवधर्माद्भवेज्ज्ञानं शिवधर्मः शिवार्चनात् ॥

इत्येष वः समाख्यातः संसारार्णववर्तिनाम् ।
शिवमोक्षक्रमोपायः शिवार्चननिषेविणाम् ॥

माघमासे तु संप्राप्ते यः कुर्यान्नक्तभोजनम् ।
कृसरं घृतसंयुक्तं भुञ्जानस्संयतेन्द्रियः ॥

सोपवासश्चतुर्दश्यां भवेदुभयपक्षयोः ।
शिवायपौर्णमास्यां तु प्रदेयं घृतकम्बलम् ॥

कृष्णं गोमिथुनं चात्र सुरूपं विनिवेदयेत् ।
शेषं कृत्वा यथेद्दिष्टं पूर्वोक्तं लभते फलम् ॥

इन्द्रनीलप्रतीकाशैर्विमानैश्शिखिसंयुतैः ।

गत्वा शिवपुरं रम्यं भुक्त्वा भोगान् यथेप्सितान्॥

सांप्राप्ते फाल्गुने मासे यः कुर्यान्नक्तभोजनम्।
श्यामाकक्षीरनीवारैर्जितक्रोधो जितेन्द्रियः॥

चतुर्दश्यामथाष्टम्यामुपवासरतो भवेत्।
पौर्णमास्यां महास्नानं पञ्चगव्यघृतादिभिः॥

वल्मीकाग्रादि मृद्भिश्च गोमूत्रैर्गोमयादिभिः।
त्वग्भिश्च क्षीरवृक्षाणां धातुगन्धादिभिर्भवेत्।
दद्याद् गोमिथुनं भक्त्या ताम्राभं परमेष्ठिने॥

शेषमन्यद्यथोद्दिष्टं कृत्वाप्नोति महत्फलम्॥

पद्मरागप्रतीकाशैर्विमानैर्मार्गसंयुतैः।
गत्वा शिवपुरं रम्यं पूर्वोक्तान् लभते गुणान्॥

चैत्रमासे शुभे प्राप्ते यः कुर्यान्नक्तभोजनम्।

पौष्टिकं पयसायुक्तं भुञ्जानः संयतेन्द्रियः ॥

दद्याद्गोमिथुनं चात्र पाटलं समलङ्कृतम् ।
शिवाय तत् सुरूपञ्च शेषं पूर्ववदाचरेत् ॥

प्राणान्ते च परं स्थानं प्रयाति शिववद्वशी ।
स्वच्छमौक्तिकसंकाशैरिन्द्रनीलोपशोभितैः ॥

जीवं जीवकसंयुक्तैर्विमानैः सुमनोरमैः ।
वैशाखमासे संप्राप्ते यः कुर्यान्नक्तभोजनम् ॥

शाल्यन्नं पयसायुक्तं भुञ्जानः संयतेन्द्रियः ।
गोष्ठशायी शिवध्यायी निशायामेववस्त्रयुक् ॥

नियमं च यथोद्दिष्टं सामान्यं सर्वमाचरेत् ।
इन्द्रनीलप्रतीकाशै विमानैस्सार्वकामिकैः ॥

गत्वा शिवपुरं दिव्यं मोदते कालमक्षयम्।
वैशाखे पौर्णमाष्यां तु कुर्यात् स्नानं घृतादिभिः॥

शिवालयं कृतं दद्यात् श्वेतं गोमिथुनं शुभम्।
हंस कुन्देन्दु सङ्काशैर्विमानैस्समलङ्कृतम्॥

सुश्वेतवृषभासक्तैः प्रयाति शिवमन्दिरम्।
सर्वातिशययुक्ताभिः स्त्रीभिस्संपरिवारितः॥

नीलोत्पलसुगन्धाभिः क्रीडते कालमक्षयम्।
ज्येष्ठमासे तु संप्राप्ते यः कुर्यान्नक्तभोजनम्॥

शाल्यन्नं पयसाधौतमजाक्षीरेणसंयुतम्।
निराशनं निशार्धं स्याद् दिवागां समनु व्रजेत्॥

हितकारी गवां नित्यमहङ्कारविवर्जितः।
पौर्णमाष्यां च पूर्वोक्तं कुर्यात्स्नानादिकं विधिम्॥

देयं गो मिथुनं चात्र धूम्रवर्णमलङ्कृतम्।
नीलोत्पलदलप्रख्यैर्महायानैरनौपमैः॥

महासिंहनिबद्धैश्च क्रीडते कालमक्षयम्।
आषाढे मासिसंप्राप्ते यः कुर्यान्नक्तभोजनम्॥

गुलखण्डाज्यसंमिश्रं सक्तुमद्यात्सगोरसैः।
दद्याद् गोमिथुनं गौरं शिवायालङ्कृतं शुभम्॥

सामान्यं च विधिं सर्वं प्रकुर्यात् प्राक्प्रचोदितम्।
शुद्धस्फटिकसंकाशैर्यानैस्सारसवाहनैः॥

अणिमादिगुणैर्युक्तः शिववद्विचरेदयम्।
संप्राप्ते श्रावणेमासि यः कुर्यान्नक्तभोजनम्॥

क्षीरषष्टिकभक्तेन सर्वभूतहितेरतः।
श्वेताग्रपादपौण्ड्रञ्च दद्याद् गोमिथुनं शिवे॥

सामान्यमखिलं कुर्यात् विधानं यत्प्रकीर्तितम्।
सुविचित्रैर्महायानैर्विचित्रैश्च नियोजितैः॥

गत्वा शिवपुरं दिव्यं पूर्वोक्ताल्लँभते गुणान्।
प्राप्तेभाद्रपदे मासि यः कुर्यान्नक्तभोजनम्॥

हुतशेषहविर्भोजी वृक्षमूलाश्रितो दिवा।
रात्रौ चायतने सुप्त्वा सर्वभूतानुकम्पकः॥

नीलस्कन्धं वृषंगाञ्च शिवाय विनिवेदयेत्।
दिवाकरकरप्रख्यैर्वज्रवैडूर्यशोभितैः॥

चक्रवाकसमायुक्तैर्विमानैस्सर्वकामिकैः।
गत्वा शिवपुरं दिव्यमरासुरवन्दितम्॥

क्रीडते स महातेजा भोगैर्यावदाभूतसंप्लवम्।
श्रीमदाश्वयुजेमासि यः कुर्यान्नक्तभोजनम्॥

घृताशनं प्रयुञ्जानः प्रसन्नात्माजितेन्द्रियः।
वृषभं नीलकण्ठाभमुरोदेशे समुन्नतम्॥

विमुच्यदद्याद्रूद्राय गामेकां समलङ्कृताम्।
विधिशेषमशेषेण पूर्वोक्तञ्च समाचरेत्॥

प्रयाणान्ते शिवस्थानं प्रयाति शिववद्वशी।
स्वच्छमौक्तिकसङ्काशैर्विमानैस्सार्वकामिकैः॥

जीवं जीवकसंयुक्तैरिन्द्रनीलोपशोभितैः।
गत्वा शिवपुरं शैवं पूर्वोक्ताल्लँभते गुणान्॥

शुशुभे कार्तिकेमासि यः कुर्यान्नक्तभोजनम्।
क्षीरादन्नं प्रभुञ्जानः सत्यवादी जितेन्द्रियः॥

दद्याद्गोमिथुनं चापि कपिलाज्वलनप्रभम्।
पूर्वोक्तं च विधिं कुर्याच्छिवतुल्यगुणो भवेत्॥

कल्पानलशिखा प्रख्यैर्महायानैर्मनोरमैः।

महासिंहकृताटोपैश्शिववच्चष्टते वशी।

मार्गशीर्षे शुभेमासे यः कुर्यान्नक्तभोजनम्।

यवान्नं पयसायुक्तं भुञ्जानस्संयतेन्द्रियः॥

दद्याद् गो मिथुनं दिव्यं पाण्डरं समलङ्कृतम्।

शिवाय सर्वं पूर्वोक्तं विधानं समुपाचरेत्॥

श्वेतपद्मसमैर्यानैः श्वेताश्ववरसंयुतैः।

गत्वा शिवपुरं दिव्यं शिवतुल्यबलो भवेत्॥

अहिंसासत्यमस्तेयं ब्रह्मचर्यं क्षमाशमः।

त्रिःस्नानञ्चाग्निहोत्रं च भूशय्या नक्तभोजनम्॥

पक्षयोरूपवासेन चतुर्दश्यष्टमीं वसेत्।

इत्येवमादि नियमा नाचरेच्च शिवं प्रति।

शिवभक्ता च या नारी ध्रुवं सा पुरुषो भवेत् ॥

स्त्रीत्वमप्युत्तमं सा चेत् कांक्षते शृणु तद्व्रतम् ।
उमामहेश्वरं नाम सदा प्रीति विवर्धनम् ॥

अवियोगकरं शान्तं धर्मकामार्थसाधनम् ।
पौर्णमास्याममावस्यां चतुर्दश्यष्टमीषु च ॥

नक्तमब्दं प्रकुर्वीत हविष्यं ब्रहमचारिणी ॥

उमामहेश्वरप्रख्यं हैमं कृत्वा सुशोभनम् ।
राजतं वाथवर्षान्ते स्नापयित्वा घृतादिभिः ॥

गन्धमाल्यैरलंकृत्य वस्त्रयुग्मैः सुशोभनैः ।
भक्ष्यैर्भोज्यैरशेषैश्च वितानध्वजचामरैः ॥

भोजयेच्छिवभक्तांश्च दीनानाथांश्च भोजयेत् (तर्पयेत्) ।
स्वशक्त्यादक्षिणां दत्वा शिवमन्तेक्षमापयेत् ॥

ताम्रकांस्यादिपात्रं वा सितवस्त्रावकुण्ठितम्।
कृत्वाचायतनं मध्ये प्रतिमामुपकल्पयेत्॥

शिरसा धार्यतत्पात्रं वितानच्छत्रशोभितम्।
ध्वजशंखादिविभवैः शिवस्यायतनं नयेत्॥

लिङ्गमूर्तेर्महेशस्य व्रतमेतन्निवेदयेत्।
तद्वेद्यां स्थापयेत्पात्रं रूपशोभा समन्वितम्॥

ततः प्रदक्षिणी कृत्य प्रणिपत्यक्षमापयेत्।
समाप्यैवं व्रतं पुण्यं शृणुयावत्फलं लभेत्॥

द्वादशादित्यसङ्काशैर्विमानैस्सर्वकामिकैः।
यथेष्टमैश्वरे लोके रुद्रैः सार्धं प्रमोदते॥

कल्पकोटिसहस्राणि कल्पकोटि शतानि च।

सा तस्यान्ते महाभोगैर्विष्णुलोके महीयते ॥

ततः कर्मावशेषेण सर्वकामसमन्विता ।
ब्रह्मलोकं समासाद्य परमंसुखमाप्नुयात् ॥

ब्रह्मलोकात्परिभ्रष्टा श्रीरिवप्रतिपूजिता ।
प्राजापत्यमवाप्नोति लोकं लोकनमस्कृता ॥

भोगांस्तनसुखं भुक्त्वा सोमलोके वसेत् सुखम् ।
सोमादैन्द्रं पुनर्लोकमासाद्यैन्द्रं पतिं लभेत् ॥

इन्द्रलोकाच्चगान्धर्वं सालोक्यं प्राप्यमोदते ।
गन्धर्वराजपतिना सार्धं भोगैरनेकधा ॥

महारत्नप्रभैर्दीप्तैरूपशोभितमद्भुतम् ।
यक्षलोकं च संप्राप्य यथाकामं प्रमोदते ॥

यक्षलोकपरिभ्रष्टा क्रीडते मेरुमूर्धनि ।

स्थानानि लोकपालानां क्रमादागत्यमोदते ॥

आलोकालोकपर्यन्ते सर्वस्मिन् क्षितिमण्डले ।
यत्र क्वचित् सुखं दिव्यं तदशेषमवाप्नुयात् ॥

एवं सा सर्वलोकेषु भोगान् भुक्त्वा यथेप्सितान् ।
क्रमादागत्यलोकेऽस्मिन् राजानं पतिमाप्नुयात् ॥

युवानं रूपसंपन्नमशेषपृथिवीपतिम् ।
धर्मकामार्थमोक्षज्ञमित्थमासाद्यमोदते ॥

ततः सा धर्मशेषेण भवतीश्वरभाविता ।
स्वकर्मवासनायोगात् पुनः प्रारभते शुभम् ॥

शुभाच्च पुनरप्येवं यात्यायति सहस्रशः ।
यावन्नाप्नोतिनिर्वेदं तावद्भ्रमति कर्मणा ॥

यावद्विवेकोवैराग्यं वैराग्याज्ज्ञानसंभवः ।

ज्ञानात् प्रवर्तते योगो योगाद् दुःखान्तमाप्नुयात् ॥

प्। ६३(६६)

याष्टम्यां च चतुर्दश्यां नियता ब्रह्मचारिणी ।
वर्षमेकं न भुञ्जीयात् महाभोगजिहीर्षया ॥

वर्षान्ते प्रतिमां कृत्वा पूर्ववद्विधिमाचरेत् ।
स्नानाद्यत्तद्व्रतं प्राप्ता पूर्वोक्तान् लभते गुणान् ॥

जाम्बूनदमयैर्यानैश्चतुद्वारैरलङ्कृतैः ।
गत्वा शिवपुरं दिव्यमक्षयं भोगमाप्नुयात् ॥

शिवादिसर्वलोकेषु भोगान् भुक्त्वा यथेसितान् ।
क्रमादागत्यलोकेऽस्मिन्राजानं पतिमाप्नुयात् ॥

यातामुपवसेदब्दं कृष्णामेकां पतिमाप्नुयात् ॥

यातामुपवसेदब्दं कृष्णामेकां चतुर्दशीम् ।

वर्षान्ते प्रतिमां कृत्वा शालिपिष्टमयीं शुभाम्॥

पीतानुलेपनैर्माल्यैः पीतवस्त्रैश्च पूजयेत्।
पूर्वोक्तमखिलं कृत्वा शिवाय विनिवेदयेत्।
सप्तभूमैर्महायानैस्तप्तचामीकरप्रभैः।
युगकोटिशतं साग्रं शिवलोके महीयते॥

शिवादिसर्वलोकेषु भोगान् भुक्त्वा यथेप्सितान्।
क्रमादागत्य लोकेऽस्मिन् यथेष्टं पतिमाप्नुयात्॥

यामावास्यां निराहारा भवेदब्दं सुयान्त्रित।
शूलं पिष्टमयं कृत्वा वर्षान्ते विनिवेदयेत्।
शिवाय राजतं पद्मं सुवर्णकृतकर्णिकम्।
भक्त्या विन्यस्य तन्मूर्ध्नि शेषं पूर्ववदाचरेत्॥

कामतोऽपि कृतं पापं ब्रूणहत्यादियत्कृतम्।
तत्सर्वं शूलदानेन भिन्द्यान्नारी न संशयः॥

महापद्मविमानेन नरनारी समाकुलम् (समन्विता)।
युगकोटिशतं साग्रं शिवलोके महीयते।
शिवलोकादि लोकेषु भुक्त्वा भोगान् यथेप्सितान्॥

इमं लोके क्रमात् प्राप्य राजानं पतिमाप्नुयात्।
पौर्णमास्यामुपवसेदब्दमेकं दृढव्रता।
वर्षान्ते सर्वगन्धाढ्यां प्रतिमां विनिवेदयेत्॥

सुविचित्रैर्महायानैर्दिव्यगन्धमयैः शुभैः।
युगकोटिशतं साग्रं शिवलोके महीयते।
यथेष्टमैश्वरे लोके भुक्त्वाभोगानशेषतः॥

क्रमादागत्यलोकेऽस्मिन् राजानं पतिमाप्नुयात्।
या कार्तिकं शुभं मासं मेकभुक्तेन यापयेत्॥

क्षमाहिंसादि नियमैः संयुक्ताब्रह्मचारिणी।
गुलाज्यमिश्रं पिण्याकं मासान्ते विनिवेदयेत्॥

अष्टम्यां च चतुर्दश्यांमुपवासरता भवेत्॥

इन्द्रनीलप्रतीकाशैर्विमानैस्सार्वकामिकैः।
वर्षायुतशतं साग्रं शिवलोके महीयते।
यथावत्सर्वलोकेषु भोगानासाद्य सर्वतः।
क्रमादागत्यलोकेष्मिन् यथेष्टं प्रतिमाप्नुयात्॥

इत्येवं सर्वमासेषु विधिस्तुल्यः प्रकीर्तितः।
एकभुक्तोपवासस्य फलं च सदृशं विदुः॥

क्षमासत्यं दयादानं शौचमिन्द्रियनिग्रहः।
शिवपूजाग्निहवनं सन्तोषास्तेय भावनम्॥

सर्वव्रतेष्वयं धर्मः सामान्याद्दशधा स्मृतः।
विशेषमपि वक्ष्यामि प्रतिमासं व्रतं प्रति॥

मार्गशीर्षे शुभेमासे वृषभं पिष्टनिर्मितम्।

गन्धमाल्यैरलङ्कृत्य शिवाय विनिवेदयेत् ॥

वृषयुक्तैर्महायानैर्वरभोगसमन्वितैः ।
वर्षायुतशतं साग्रं शिवलोके महीयते ॥

सर्वदेवनिकायेषु संप्राप्यविपुलं सुखम् ।
क्रमादागत्यलोकेऽस्मिन् राजानं पतिमाप्नुयात् ॥

पौष्यमासे पिनाकं तु गन्धमाल्यैरलंकृतम् ।
ताम्रकांस्यादिपात्रे वा कृत्वा दद्यात् पिनाकिने ॥

महापुष्पकयानेन दिव्यगन्धप्रवाहिना ।
वर्षायुतशतं साग्रं रुद्रलोके महीयते ।
भुक्त्वा तु विपुलान् भोगान् अशेषपुरसंभवान् ।
संप्राप्यैवं क्रमाल्लोकान् यथेष्टं पतिमाप्नुयात् ॥

माघेरथं चाश्वयुक्तं गन्धमाल्यानुशोभितम् ।
पिष्टलिङ्गसमायुक्तं कृत्वा यतनमानयेत् ॥

महारथोपमैर्यानैः श्वेताश्ववरसंयुतैः ।
वर्षायुतशतं साग्रं शिवलोकेमहीयते ॥

सर्वामरनिकायेषु प्राप्यभोगान् यथेप्सितान् ।
क्रमादागत्य लोकेऽमिन् यथेष्टं पतिमाप्नुयात् ॥

फाल्गुने प्रतिमां पैष्टीं कृत्वा नृतसमन्विताम् ।
गन्धमाल्यैरलंकृत्य स्थापयेदीश्वरालये ॥

यानैरप्रतिमैर्दिव्यैर्गेयनाट्यसमन्वितैः ।
कुलैर्वर्षायुतं साग्रं शिवलोके महीयते ॥

सर्वामरनिकायेषु प्राप्यभोगात् सुदुर्लभान् ।
संप्राप्तेऽस्मिन् क्रमाल्लोके यथेष्टं पतिमाप्नुयात् ॥

चैत्रे भवं कुमारं च कृत्वा पैष्टमलंकृतम् ।
स्थाप्यपात्र्यां यथोक्तायां मानयेच्छिवमन्दिरम् ॥

शरदिन्दुप्रतीकाशैर्विमानैः सार्वकामिकैः।
वर्षायुतशतं साग्रं शिवलोके महीयते॥
कर्मक्षयादिहागत्य पुत्रपौत्रसमन्विता।
अभीष्टं पतिमाप्नोति लभेद्भोगान् सुदुर्लभान्॥

तण्डुलाढकपिष्टेन कृत्वाकैलासपर्वतम्।
ईश्वरोमासमायुक्तं सर्वधातुविभूषितम्॥

कन्दैरैर्निचितं(च्छीद्रै)चित्रैर्लवणप्रस्तसंयुतम्।
सर्वरत्नसमायुक्तं स्थापयेदीश्वरालये॥

कैलासव्रतमित्येवं वैशाखे या समाचरेत्।
कैलासकल्पैस्साधारैश्शिवलोके महीयते॥

शिवादिसर्वलोकेषु भुक्त्वाभोगानशेषतः।
क्रमादागत्यलोकेऽस्मिन् नगेन्द्रेमोदते चिरम्॥

लिङ्गं पिष्टमयं कृत्वा ज्येष्ठमासे सवैदिकम्।
भक्त्या संपूज्यगन्धाद्यैर्वस्त्रयुग्मेन वेष्टयेत्॥

उपशोभाविशेषैश्च तत्र जागरमाचरेत्।
प्रतिपात्रे प्रतिपाद्यैर्नीत्वा चायतनेन्यसेत्॥

शुद्धस्फटिकसङ्काशैर्विमानैस्सार्वकामिकैः।
वर्षकोट्यायुतं दिव्यं रुद्रलोके महीयते॥

भुक्त्वा भोगान् यथाकाममशेषपुरसंभवान्।
क्रमादागत्यलोकेऽस्मिन् राजानं पतिमाप्नुयात्।
गृहं पिष्टमयं कृत्वा चाषाढे सप्तभूमिकम्॥

सर्वबीजरसैश्चापि संपूर्णं शुभलक्षणम्।
गृहोपकरणैर्युक्तं मुसलोलूखवादिभिः॥

सर्वरत्नादिभिश्चान्यैर्दासी शय्याद्यलंकृतैः।

एतैः पिष्टमयैः सर्वैः प्रदीपाद्युपशोभितैः।
सर्वभक्ष्यसमायुक्तं गन्धमाल्यैरलंकृतम्॥

कृष्णरक्तसितैः पीतैर्ध्वजवस्त्रोपशोभितम्।
चतुर्विधेन चरुणा संयुक्तं सर्वपैस्तथा॥

आषाढे पौर्णमास्यां तु गृहं स्थाप्य शिवाग्रतः।
सर्वोपकरणोपेतं प्रणिपत्यन्यवेदयेत्॥

सप्तभौमैर्महायानैः सर्वभोगपरिप्लुतैः।
वर्षकोटिशतं साग्रं शिवलोके महीयते॥

भुक्त्वा तु विपुलान् भोगान् सर्वलोकेष्वनुत्तमान्।
प्राप्नोति सर्वभोगाढ्यं सप्तभौमं गृहं भुवि॥

सर्वधातु समाकीर्णं विचित्रध्वजशोभितम्।
निवेदयीत शर्वाय श्रावणे तिलपर्वतम्॥

स्वच्छेन्द्रनीलसङ्काशैर्यानैरप्रतिमैः शुभैः।
वर्षकोटिशतं दिव्यं रुद्रलोकेमहीयते॥

संप्राप्यविविधान् भोगान् मनसश्च यथेप्सितान्।
क्रमाल्लोकमिमं प्राप्य राजानं पतिमाप्नुयात्॥

कृत्वा भाद्रपदे मासे शोभनं शालिपर्वतम्।
सुवर्णवस्त्रसंयुक्तं शिवायविनिवेदयेत्॥

सचित्रैर्महायानैस्सर्वभोगसमन्वितैः।
वर्षकोटिशतं साग्रं रुद्रलोकेमहीयते॥

संप्राप्यविविधान् भोगाननेकपुरसंभवान्।
क्रमादागत्यलोकेऽस्मिन् राजानं पतिमाप्नुयात्॥

कृत्वा चाश्वयुजे मासि विपुलं धान्यपर्वतम्।
सुवर्णं वस्त्रसंयुक्तं शिवाय विनिवेदयेत्॥

सुविचित्रैर्महायानैर्वरभोगसमन्वितैः ।

वर्षकोटिसहस्राणि रुद्रलोके महीयते ॥

रुद्रलोकादिलोकेषु भुक्त्वाभोगान्यथेप्सया ।

संप्राप्तास्मिन् क्रमाल्लोकान् राजानं पतिमाप्नुयात् ॥

धनधान्यादिसंयुक्तं सर्वबीजरसान्वितम् ।(दिभिः)

सर्वधातु समायुक्तं सर्वरत्नोपशोभितम् ।

शृङ्गैश्चतुर्भिस्संयुक्तं वितानच्छत्रशोभितम् ॥

गन्धमाल्यैश्च धूपैश्च प्रदीपैश्चोपशोभितम् ।

विविधैर्गीतवृत्तैश्च शंखवीणादिभिः स्वनैः ॥

ब्रह्मघोषैस्तथा पुण्यैर्मङ्गलैश्च विशेषतः ।

महाध्वजाष्टभिर्युक्तं नानाकुसुममण्डितम् ॥

नगेन्द्रं मेरुनामानं त्रैलोक्याधारमुत्तमम् ।

तस्य मूर्ध्निशिवं कुर्यात् सर्वदेवसमायुतम् ॥

दैत्यगन्धर्वसिद्धैश्च सुरभूतगणैस्तथा ।
विद्याधराप्सरोनागैः ऋषिभिश्च विशेषतः ॥

शालिपिष्टमयं सर्वं रूपं कुर्याद्विचक्षणः ।
देवस्य दक्षिणे हस्ते शूलं त्रिदशपूजितम् ॥

एवं सर्वेषु देवेषु कुर्यादस्त्राण्यथाक्रमात् ॥

शिवस्य महतीं पूजां कुर्याच्चरुसमन्वितम् ।
पूजयेत् सर्वदेवांश्च दशादिक्षुबलिं हरेत् ॥

द्विजांश्च भोजयेत्सर्वान् शिवभक्तान् सदक्षिणम् ।
दीक्षितान् व्रतिनश्चान्यानमुगम्यतु साधकान् ॥

आचार्यानुमते साध्वी नमेन्मेरुमुपस्थितम् ।
सर्वारम्भसमायुक्तं यथाविभवविस्तरम्(कल्पितम्) ॥

निवेदयीत रुद्राय कार्तिकेनगमुत्तमम् ।
या कुर्यात् सकृदप्येवं तस्याः पुण्यफलं शृणु ॥

पू । ६७(७०)

सर्वागमेषु यत्पुण्यं कथितं मुनिभिः पुरः ।
तत्पुण्यं कोटिगुणीतं माप्नुयात् सा न संशयः ॥

महारत्नप्रभैर्यानैस्सर्वकामसमन्वितैः ।
नृत्तगीतादिवाद्यैश्चाप्सरोगणसेवितैः(शोभितैः) ॥

सूर्यकोटिसमप्रख्यैर्विमानैर्मेरुसन्निभैः ।
नरनारीसमाकीर्णैर्दिव्यगन्धवहैः शुभैः ॥

देवदानवगन्धर्वैः स्तूयमाना गणाधिपैः ।
स्वच्छन्दा सर्वगाभूत्वा प्रयातीश्वरमन्दिरम् ॥

कल्पकोटिशतं दिव्यं मोदते सा महातपाः ।

एवं सर्वेषु लोकेषु भोगान् भुक्त्वा यथेप्सितान् ॥

पुण्यक्षयादिहागत्य महीपाल प्रिया भवेत् ।
सुरूपा सुभगा नित्यं भवेदीश्वरभाविता ॥

यद्यत्कार्यं समुद्दिश्य नरनारीनपुंसकाः ।
पूजयन्ति शिवं भक्त्या तत्तदेवाशु जायते ॥

मृण्मयं दारुजं शैलं पैष्टिकं वा सुकलिमतम् ।
कृत्वा गृहं महं वापि यथा विभवसंभवम् ॥

सर्वोपकरणोपेतं सर्वधान्यैः प्रपूरितम् ।
शिवायेत्थं गृहं दत्वा सर्वकामानवाप्नुयात् ॥

उक्तवैकभक्तं हेमन्ते मासमेकं सुयन्त्रिता ।
मासान्ते च रथं कृत्वा चित्रवस्त्रोपशोभितम् ॥

श्वेतैश्चतुर्भिस्संयुक्तं वृषभैस्समलंकृतम् ।

शोभितं ध्वजयूपाद्यैः छत्रचामरदर्पणैः ।
तण्डुलाढकपिष्ठेन कृत्वा लिङ्गं स वैदिकम् ॥

विन्यस्य रथमध्ये तु पूजयेत् कृतलक्षणम् ।
तद्रात्रौ रथमार्गेण शंखभेर्यादिभिः स्वनैः ॥

भ्रामयित्वा शनैः पश्चाच्छिवायतनमाप्नुयात् (न येत्) ।
तत्र जागरपूजाभिः प्रदीपाद्युपशोभितैः ।
प्रोक्षणीय प्रदानैश्च क्षपयेतशनैः क्षमाम्(ण) ॥

प्रभाते स्नापनं कृत्वा तद्भक्तानां च भोजनम् ।
दीनानाथान्धकेभ्यश्च यथाशक्त्या च दक्षिणाम् ॥

रथशोभासमायुक्तां शिवाय विनिवेदयेत् ।
भुक्त्वा च बान्धवैः सार्धं प्रणम्येशं गृहं व्रजेत् ।
सर्वव्रतानां परमंमस्मिन् धर्मसमाप्यते ।
व्रतं शिवरथं नाम सर्वकामार्थसाधकम् ॥

सर्वव्रतेषु यत्पुण्यं सर्वयज्ञेषु यत्फलम्।
सर्वं शिवरथे नैव सा पुण्यफलभाग्भवेत्॥

सूर्यायुतप्रतीकाशैर्विमानैः सार्वकामिकैः।
त्रिसप्तकुलजैः सार्धं शिवलोके महीयते॥

पू। ६८(७१)

भुक्त्वा च विपुलान् भोगान् सर्वलोकेष्वनुक्रमात्।
कल्पकोट्ययुतं साग्रं कल्पान्ते स महीपतिम्॥

युवानं रूपसम्पन्नं भर्तारं भोगसंयुतम्।
लभते कुशलं नित्यं राजानं रतिलालसम्।
पञ्चतूली समायुक्तां मृद्वीं खट्वांसुशोभनाम्।
सर्वोपकरणोपेतां शिवशय्यां प्रकल्पयेत्।
शिवं देवी युतं कृत्वा पैष्टमस्यां निवेदयेत्॥

शिवज्ञानार्थतत्वज्ञमाचार्यं विनयान्वितम्।
संपूज्यगन्धपुष्पाद्यैर्वस्त्रालंकारचामरैः।

भक्ष्यभोज्यैरशेषैश्च ततः शय्यां निवेदयेत् ॥

तत्रोर्णातूलतन्तूनां परिसंख्या तु यावती ।
तावद्वर्षसहस्राणि शिवलोके महीयते ॥

शिवादिसर्वलोकेषु भुक्त्वा भोगानशेषतः ।
क्रमादागत्यलोकेऽस्मिन् सिंहासनपतिर्भवेत् ॥

दशगावस्सवृषभा वृषभैकादशी स्मृता ।
शिवाय विनिवेद्यैतामवधारयतत्फलम् ॥

तत्रैकादशतुल्यात्मा बलभोगादिभिर्गणैः ।
शिवादिसर्वलोकेषु यथेष्टं मोदते सुखी ॥

कल्पकोटिसहस्राणि कल्पकोटिशतानि च ।
भुक्त्वा तु विपुलान् भोगान् अशेष पुरसंभवान् ॥

तदन्ते ज्ञानमासाद्य प्रसादात् परमेष्ठिनः ।

विमुच्यमोहकलिलं स्वात्मन्येवा नु(व)तिष्ठति(ते) ॥

वृषभं गोशतं दद्यात् शिवायातीवशोभनम् ।
त्रिसप्तकुलजैस्सार्धं शृणुयात् फलमाप्नुयात् ॥

सूर्यकोटिसमप्रख्यैः सर्वकामसमन्वितैः ।
महायानैरसंख्यातैःरमरासुरपूजितैः ॥

शतरुद्रबलश्चैव वीरभद्र इवापरः ।
गत्वाशिवपुरं दिव्यमशेषाधिपतिर्भवेत् ।
भुक्त्वा तु विपुलान् भोगान् प्रलये सर्वदेहिनाम् ।
देहकञ्चुकमुत्सृज्य स कैवल्यमवाप्नुयात् ॥

सर्वज्ञः सर्वपरमः शुद्धः स्वात्मन्यव स्थितः ।
सर्वगः परिपूर्णश्च शिववत्पतिरव्ययः ॥

यो दद्यादुभयमुखीं शिवाय सुशोभनाम् ।
सप्तद्वीपां क्षितिं दत्वा यत्फलं तदवाप्नुयात् ॥

पादद्वयं शिरोर्धं च यथावत्सस्यनिर्गतम्।
तथा गौः पृथिवी ज्ञेया तद्दातास्यान्महीपतिः॥

इति श्रीशिवधर्मशास्त्रे उपवासविधिसमयमुखी
दानविधिर्दशमोध्यायः॥

एकादशोऽध्यायः

नन्दिकेश्वर उवाच

सर्वेषामेववर्णानां शिवाश्रमनिषेविणाम्।
शिवधर्मः शिवेनोक्तो धर्मकामार्थमुक्तये॥

ब्राह्मणः क्षत्रियो वैश्यः स्त्रीशूद्रो वा शिवाश्रमी।
वानप्रस्थो गृहस्थो वा यच्चान्यो वा शिवाश्रमी॥

स्वाश्रमादुत्तरे कुर्यात् पुष्पारामं सुशोभनम्।

अन्यागारसमायुक्तमैशान्यामीश्वरालयम् ॥

प्रदेशा संभवे कुर्याद्यत्रस्यात् संभवो भुवि ।
शिवाद्दक्षिणतः कुर्यात् तद्भक्ताभ्यागतालयम् ॥

त्रिसन्ध्यमर्चयेदीशमग्निकार्यं च भक्तितः ।
द्विसंख्यमेककालं वा पूजयेद्भक्तितः शिवम् ॥

असंपूज्य शिवं मोहात् न भुञ्जीतकदाचन ।
एष धर्मः परोज्ञेयश्शेषो भवति मानवः ।
कार्यातिपातसंरोध व्याधिविद्रविणादिषु ॥

मनसा पूजयेद्भक्त्या वाचिकैर्वा जपादिभिः ।
शिवाग्रमाश्रितैः पूजा कर्तव्या यत्नतः सदा ॥

मनसा पूजयेद्योगी पुष्पैर्वारण्यसंभवैः ।
शिवार्थं पुष्पहिंसा या न भवेत्सतु हिंसकः ॥

शिवार्चाग्नि परो नित्यं तद्भक्तो तिथि पूजकः।
पर्वमैथुनवर्जी स्यात् श्रीमान् शिवगृहाश्रमी॥

देवाग्न्यतिथिभैक्षार्थां पचेन्नैवात्मकारणात्।
आत्मार्चयः पचेन्मोहात् नरकार्थं स जीवति।
देवार्थं पचनं येषां सन्तानार्थं च मैथुनम्।
स्वर्गार्थं जीवितं तेषां नरकार्थं विपर्यये॥

वित्तात् तृतीयभागेन प्रकुर्वीत शिवार्चनम्।
प्रकुर्वीत तदर्धे न यतो नित्यं हि जीवितम्॥

न्यायो पार्जितवित्तः स्यादन्यायान् परिवर्जयेत्।
अन्याये नार्चितैर्द्रव्यैः नरकार्थं स जीवति।
यः शिवब्रह्मचारी स्यात् स शिवार्चाग्नि तत्परः॥

भवेज्जितेन्द्रियः शान्तो नैष्ठिको भौतिकोऽपि वा।
सर्वसङ्गविनिर्मुक्तः कन्दमूलफलाशनः।
शिववैखानसो ज्ञेयः शिवार्चाग्निपरो वने॥

निर्गतः सर्वसंगेभ्यः शिवध्यानरतः सदा ।
ज्ञेयः शिवयतिश्चैव भस्मनिष्ठो जितेन्द्रियः ॥

रुद्राक्षगणहस्तः स्यात् जटां चैकाञ्चमस्तके ।
लिङ्गं शिवाश्रमस्थानां भस्मनैव त्रिपुण्ड्रकम् ॥

हस्ते मूघ्न्युपवीते वा रुद्राक्षं धारयेत् तु यः ।
सोर्ध्वगः सर्वभूतानां रुद्रलोकन्तु गच्छति ॥

पू । ७०(७३)

रुद्रभक्तैः शिरस्येका धार्या रुद्रजटा सदा ।
ध्वंसिनी दुष्टसत्वानां रुद्रत्वं च तथाप्नुयात् ॥

सितेन भस्मना कुर्यात् त्रिसन्ध्यं यस्त्रिपुण्ड्रकम् ।
सर्वपापविनिर्मुक्तः शिवेनसहमोदते ।
रुद्राग्नेर्यद्वलं वीर्यं तद्भस्मपरिकीर्तितम् ॥

ध्वंसनं सर्वदुष्टानां सर्वपापविशोधनम्।
योगीसर्वांगिकस्नानमापादतलमस्तकम्॥

त्रिसन्ध्यमाचरेन्नित्यमाशुयोगमवाप्नुयात्।
यः स्नानमाचरेन्नित्यमाग्नेयं संयतेन्द्रियः॥

कुलैकविंशमुत्तार्य स गच्छेत्परमां गतिम्।
भस्मस्नानं जलस्नानमसंख्येयगुणाधिकम्॥

तस्माद्वारुणमुत्सृज्य स्नानमाग्नेयमाचरेत्।
सर्वतीर्थेषु यत्पुण्यं सर्वयज्ञेषु यत्फलम्।
तत्फलं लभते सर्वं भस्मस्नानं समाचरेत्॥

महापातकयुक्तो वा युक्तो वा सर्वपातकैः।
भस्मनापरमं स्नानं पवित्रं नैव विद्यते॥

उक्तैवं मुनिदेवेभ्यः स्नातो देवः शिवः स्वयम्।
तया प्रभृति ब्रह्माद्याः मुनयश्च शिवार्थिनः॥

सर्वं सर्वं सुयत्नेन भस्मस्नानं प्रचक्रिरे ।
तस्मादेतच्छिवस्नानमाग्नेयं यः समाचरेत् ॥

अनेनैव शरीरेण स रुद्रो नात्र संशयः ।
दुश्शीलः शीलयुक्तो वा यो वा को वा फलार्थिभिः ॥

भूतिशासनसंयुक्तः सपूज्योराजपुत्रवत् ।
गुणवत्पात्र पूजायानस्याच्छासनपूजनम् ॥

शासनं पूजयेत्तस्मादविचारं शिवज्ञया ।
शिवाज्ञा पूजनात् साक्षाच्छिवो भवति पूजितः ॥

अविकल्पमतिस्तस्मात् पूजयेच्छिवशासनम् ।
छद्मनापि हि यो धत्ते भूतिशासनमैश्वरम् ।
सोऽपि यां गति माप्नोति न तां क्रतु शतैरपि ॥

आचम्यतोयविधिना निर्लेपः शिवभस्मना ।

गन्धलेपविशुद्धार्थं नित्यमद्भिरुपस्पृशेत् ॥

गन्धलेपविहीनो हि पि भावदुष्टेन शुध्यति । ष्टो
भावशुद्धया भवेच्छुद्धिः शुद्धभावस्ततो भवेत् ।
स्नानं वारुणमाग्नेयं दिव्यं वायव्यमानसे ॥

पञ्चस्नानानि विप्राणां विहितानि विशुद्धये ।
वारुणं वारुणस्नानमाग्नेयं भस्मना भवेत् ॥

वृष्ट्या सातपया दिव्यं वायव्यम् रजसा गवाम् ।
मानसं ध्यानमन्त्रादि विहितं विश्वयोनिना ॥

उदकुम्भसहस्त्रेण मृद्भाराणां शतेन च ॥

आमृत्यो आचरन् शौचं भावदुष्टो न शुद्धयति ॥

भावपूतं भवेच्छौ चं वस्त्रपूतं जलं पिबेत् ॥

दृष्टिपूतं न्यसेत् पादं सत्यपूतं वचो वदेत्।
जलाकलापधारी स्यात् पक्षादावपनं भवेत्॥

यथैव पुण्यं दीक्षायां तत्पुण्यं पवने भवेत्।
जटीमुण्डीशिखीवापि भिक्षाशी विगतस्पृहः॥

मौनी भूतानुकम्पी च यतिश्शान्तिमतिर्भवेत्(श्चरेत्)।
माधूकरं चरेद्भैक्षमेकान्नं परिवर्जयेत्।
उपवाससमं भैक्ऽमेकान्नं गृहीणां स्मृतम्॥

यः सर्वसङ्गनिर्मुक्तः शूद्रश्शिवपरायणः।
सोऽपीहवपनं कृत्वा योगीन्द्रानुचरो भवेत्॥

वसेदायतने नित्यं स गणः शिवधार्मिकः।
पुष्पारामैककर्मात्मा पुष्पपालक्रियापरः॥

त्रिस्नानपूजासंयुक्तः कौपीनाच्छादकः सदा।

योगिनां भक्तियोगेन योगस्थानमवाप्नुयात् ।
शिवध्यानपराश्शान्ताश्शिवभक्तिपरायणाः ॥

भावपूताश्शिवस्यैते शिवाश्रमसमाश्रिताः ।
महाव्रताष्टकं धार्यमीशेनोक्तं शिवार्थिनाम् ॥

सर्वव्रतानां परममस्मिन् धर्मस्समाप्यते ।
शिवेभक्तिस्सदाक्षान्तिरहिंसा सर्वदाशमः ॥

सन्तोषस्सत्यमस्तेयं ब्रह्मचर्यं तथाष्टमम् ।
यथासंभवपूजाभि कर्मणामनसागिरा ॥

शिवेभक्तिः सदाकार्या तद्वच्च शिवयोगिषु ।
स्वदेहान्निर्विशेषेण शिवभक्तांश्च पालयेत् ॥

भयदारिद्र्यदुःखेभ्यः (रोगेभ्यः) तेषां कुर्यात् प्रियाणि च ।
शिवस्य परिपूर्णस्य किं नामक्रियते नरैः ।
यत्कृते शिवभक्तानां तच्छिवस्य कृतं भवेत् ॥

सुदूरमपि गन्तव्यं यत्र माहेश्वरो जनः।
ते च प्रयत्नादाराध्यास्तेषां सन्निहितो हरः॥

महेश्वरस्य यो भक्तः शिवार्चनरतः सदा।
आज्ञां कृत्वा यथान्यायमश्वमेधफलं लभेत्।
नित्यं शिवकथासक्तो नित्यं शिवपरायणः॥

अर्चयित्वा यथान्यायं गाणापत्यमवाप्नुयात्॥

पू। ७२(७५)

शिवाश्रमगतं भक्त्या शिवभक्तं प्रपूजयेत्॥

स्वागतासनपाद्यार्घ्यैर्मधुपर्कादि भोजनैः।
यः स्वागतं नमस्कारं कुर्याद्वाप्यभिवादनम्॥

दशवर्षसहस्राणि सोऽग्निलोके महीयते।
प्राप्ताय शिवभक्ताय यो दद्यात् स्वयमासनम्॥

विंशद्वर्षसहस्राणि पुरन्दरपुरे वसेत्।
शिवभक्ताय शान्ताय पादौ प्रक्षाल्यभक्तितः॥

घृताभ्यंगं ततो दत्वा विष्णुलोके महीयते (लोके वसेन्नरः)।
प्राप्ताय शिवभक्ताय पाद्याचमनपूर्वकम्।
योऽर्घ्यं निवेदयेद्भक्त्या सूर्यलोकं स गच्छति॥

शिवभक्तद्विजं प्राप्तं मधुपर्काद्युपक्रमात्।
भोजयित्वा यथान्यायं शिवलोके महीयते॥

श्रान्तं संवाहनं कृत्वा सोमलोके महीयते।
प्रतिश्रयप्रदानेन हैमं स्वर्गे गृहं भवेत् (लभेत्)॥

जलं सुशीतलं दत्वा सर्वकामानवाप्नुयात्।
लभेद्दीपप्रदानेन ज्ञानचक्षुरतीन्द्रियम्॥

मृदुशय्याप्रदानेन सिंहासनपतिर्भवेत्।

यो दद्यादम्भसा स्नानं वारुणं लोकमाप्नुयात् ॥

स्वेदबिन्दुपरीतांगमध्वगं श्रमकर्शितम् ।
संवीज्यतालवृन्तेन वायुलोके महीयते ॥

क्षुत्पिपासा तुरं श्रान्तं मलीनं चैव रोगिणम् ।
पालयित्वा यथाशक्त्या सर्वपापैः प्रमुच्यते ॥

रोगार्तस्य शिवं कृत्वा भेषजाद्यैः प्रयत्नतः ।
युगकोटिशतं साग्रं शिवलोके महीयते ॥

सुदुःखार्णवनिर्मग्नं हाहाभूतमचेतनम् ॥

समुद्धृत्य यथा शक्त्या सर्वकामानवाप्नुयात् ।
पतिताभिशस्तसंकीर्ण श्वचण्डालादिपक्षिणाम् ।
कारुण्यात्सर्वभूतानां देयमन्नं स्वशक्तितः ॥

अत्यल्पमपिकारुण्याद्दत्तं भवति चाक्षयम् ।

तस्मात्तु सर्वभूतेभ्यः करुणादानमुत्तमम् ॥

अभावे तृणभूम्यम्बु पात्रेन्धनफलादिकम् (वा) ।
दत्वागतनराणां च स्वर्गं योऽनिप्रियेण वा ॥

न ही दृक्स्वर्गसोपानं यथा लोके प्रियं वचः ।
इहामुत्रसुखं तेषां वाग्येषां मधुरा सदा ।
अमृतस्यन्दिनीं वाचं चन्दनस्पर्शशीतलाम् ॥

धर्माविरोधिनीमुक्त्वा सुखमक्षयमाप्नुयात् ।

पू । ७३(७६)

अलं दानेन विप्रेन्द्र यजनाध्ययनेन वा ।
इदं ते स्वर्गसोपानममलं यत्प्रियं वचः ॥

प्रत्युत्थानाभिगमनमनुव्रज्यं प्रियं वचः ।
पूर्वाभि भाषिणं दृष्ट्वा प्रत्येकं स्वर्गहेतवः ॥

संपृच्छेदागतं भक्त्या स्वागतं विनयेन तु ।
गमनेप्यस्य वक्तव्यं पन्थानः सन्तुते शिवाः ॥

शिवं भवतु ते नित्यमशेषार्थप्रसाधकम् ।
आशीर्वादमिदं वाच्यं सर्वकार्येषु सर्वदा ॥

नमस्कारादिवादेषु स्वस्तिमङ्गलवाचने ।
शिवं भवतु ते नित्यं प्रब्रूयात् सर्वकर्मसु ॥

एवमादि शिवाचारमनुतिष्ठन् शिवाश्रमी ।
अशेषपापनिर्मुक्तः शिवलोके महीयते ॥

शिवभक्तेषु या भक्तिः क्रियते हि सदानरैः ।
शिवे भवति सा नित्यं भक्तिर्भक्तैरनुष्टिता ॥

आक्रुष्टस्ताडितो वापि यो नाक्रोशेन्नताडयेत् ।
वागाद्यविकृतस्वस्थः क्षान्तिरेवाभिधीयते ॥

सर्वेषामेवतीर्थानां तीर्थं ज्ञानस्य पारगः।
ज्ञानातीर्थात्परं तीर्थं यत्पूर्णं क्षान्तिवारिणा॥

ज्ञनं योगं तपोजप्यं यज्ञदानादिसत्क्रियाम्॥

क्रोधनस्य वृथायस्मात् तस्मात् क्रोधं विवर्जयेत्॥

मर्मास्थि प्राणहृदयं निर्दहेदप्रियं वचः।
नवाच्यमप्रियं तस्माच्छिवभक्ते विशेषतः॥

क्षमादानं क्षमासत्यं क्षमाहिंसा क्षमाश्रुतम्।
क्षमास्वर्गश्च मोक्षश्च क्षमयेतज्जगद्धृतम्॥

सशूरस्सात्विको विद्वान् स तपस्वी जितेन्द्रियः।
ये नाशुक्षान्ति बाणेन क्रोधशत्रुर्विदारितः॥

निर्मलैः क्षान्तिसलिलैर्लोकमासाद्यशीतलैः।
इह सौख्यमवाप्नोति परत्र च शिवां गतिम्॥

आत्मवत्सर्वभूतानां यो हिताय शिवाय च।
सर्वथा वर्तते नित्यमहिंसेयमुदाहृता॥

सर्वशास्त्राणि वेदाश्च यज्ज्ञात्वा लभते फलम्।
(या) न हिंसन्ति भूतानि तस्य पुण्यं ततोऽधिकम्॥

त्रैलोक्यमखिलं दद्यादपि यो रत्नपूरितम्।
चरेत्तपांसि सर्वाणि स तत् तुल्यमहिंसया॥

अहिंसाख्यः परोधर्मः शक्तानां परिकीर्तितः।
अशक्तानामयं धर्मो दानयज्ञादि पूर्वकम्॥

प्। ७४(७७)

नान्तः परं प्रपश्यामः क्वचिदप्यागमेवयम्।
पुंसामभयदानात् तु दानमद्भुतदर्शनम्॥

सर्वभूतामयं दत्वा यश्चरेच्छान्तमानसः।

इहैव सर्वभूतेभ्यो भयं तस्य न विद्यते ॥

यो न हिंसन्ति भूतान्ति स्थावराणि चराणि च ।
सर्वदुःखविनिर्मुक्तः परांशान्तिमवाप्नुयात् ॥

वाचारमन्ति पापैश्च ह्यतिक्रूरानराधिपाः (धमाः) ।
आभूतसंप्लवं यावत् पच्यते नरकेषु ते ॥

स्वदेशे यो नृपः कुर्यात् प्रणिघातनिवारणम् ।
स नृपः सह देहेन नन्दते विभवैश्चिरम् ॥

देहान्ते च महाभोगैः समस्तकुलसंयुतः ।
कल्पकोटिशतं साग्रं शिवलोके महीयते ॥

स्वात्मार्थं वा परार्थं वा समस्तेन्द्रियसंयुतः ।
नाकार्ये संप्रवर्तेत तदाहुश्शमलक्षणम् ॥

यः प्रशान्तेन्द्रियग्रामस्सदा चन्द्रांशुनिर्मलम् ।

संप्राप्नोति शिवस्थानं शान्तश्शान्तेन चेतसा ॥

यथाकालोपपन्नेभ्यो न्यायवृत्त्या गमेन च ।
उत्पन्नार्थेन यस्तोषस्ससन्तोषः प्रकीर्तितः ॥

अतीतानागतार्थेषु वर्तमानेषु सर्वदा ।
ना सक्तिर्न स्मृतिर्वापि सन्तोषोऽयं परैः स्मृतः ।
तेन सर्वमखैरिष्टं तेनावाप्तं च तत्पदम् ।
येन तृष्णाग्र(ग्)हं त्यक्त्वा सन्तोषस्सम्यगाश्रितः ॥

सन्तोषैश्वर्ययुक्तानां यत्सुखं शान्तचेतसाम् ।
देवासुरमनुष्याणां कुतः स्वप्नेऽपि तत्सुखम् ॥

स्वानुभूतं स्वदृष्टं च यः पृष्टोऽर्थं न गूहते ।
यथाभूतार्थकथनमित्येतत् सत्यलक्षणम् ।

परपीडाविनिर्मुक्तं यावत् स्याद् वचनं शिवम् ॥

अश्वमेधायुतं पुण्यं सत्यं च तुलयाधृतम्।
अश्वमेधायुतात्सत्यमधिकं दर्शितं गुणैः॥

सत्ये प्रतिष्ठितं ज्ञानं धर्मं सत्ये प्रतिष्ठितम्।
सत्ये प्रतिष्ठितं शौचं सत्ये मोक्षं प्रतिष्ठितम्॥

सत्ये प्रतिष्ठितं शौच सत्ये मोक्षः प्रतिष्ठितम्॥

स्वामिनारक्ष्यमाणानामुत्सृष्टानां च संभ्रमात्।
परस्वानादानमेतदेतदस्तेयलक्षणम्॥

अलोभेन परस्वेषु यो मनामपि वर्तते।
कर्मणा मनसा वाचा स तृप्तः शिवतां व्रजेत्॥

प्। ७५(७८)

मैथुनस्या समाचारस्तदचित्तमजल्पितम्॥

लक्षणं ब्रह्मचर्यस्य समस्तेन्द्रियसंयमः।

ब्रह्मचर्ये स्थितं सत्यं ब्रह्मचर्ये स्थितं तपः ॥

ब्रह्मचर्ये स्थितं ज्ञानं ब्रह्मचर्ये स्थितं क्षमा ।
ये स्थिता ब्रह्मचर्येण ते नित्यं संस्थिताश्शिवे ॥

एकरात्रस्थितस्यापि या गतिर्ब्रह्मचारिणः ।
गृहस्थेन न सा शक्या प्राप्तुं यज्ञशतैरपि ॥

यस्संभवे समुत्सृज्य चेतसास्ते निराकुलम् ।
अहोयति वरः श्रीमानुपयातिमहत्तपः ।
पर्वमैथुनवर्जीयः परदारविवर्जितः ॥

ब्रह्मचारीसमः सोऽपि ज्ञेयश्शिवहृताश्रमी ।
शिवाग्न्यतिथिगुर्वर्थं कुर्वन् कर्माणि सर्वतः ॥

अहिंसकस्सविज्ञेय एतदप्याश्रमत्रयम् ।
समाप्यगुरुकार्यायोपयुक्ते सदानरः ॥

तस्य सिध्यन्ति कार्याणि मनसा चिन्तितानि च ।
एषधर्मद्रुमः श्रीमान् नष्टशाखाश्शिवोद्भवः ॥

न शक्यो विस्तराद्वक्तुमुपशाखा प्रभेदतः ।
ये पठन्ति शिवे भक्ता आचाराध्यायमुत्तमम् ॥

त्रिसप्तकुलजैस्सार्धं शिवलोकं व्रजन्ति ते ।
इति शिवधर्मशास्त्रे एकादशोध्यायः ॥

अथ द्वादशोध्यायः

नन्दिकेश्वर उवाच

अथ संक्षेपतो वक्ष्ये शिवभक्तानुकम्पया ।
आद्यं शाखोपशाखार्थं शिवभक्तिसमुद्भवम् ॥

क्वचिद्गच्छन् यथा पश्यन् न शिवलिङ्गमपूजितम् ।
तदा संपूज्य यो गच्छेत् स रुद्रो नात्रसंशयः ।

स्नानं नैवेद्यवस्त्राद्यमाददीत प्रियाण्यपि ॥

व्यक्तं तच्छिवमुद्दिश्य तदादानेन यत्फलम् ॥

दृष्ट्वा यतनमासाद्य नमस्कृत्य शिवं व्रजेत् ।
चतुष्पथ नदी शैलं शिवयोगिनमेव च ॥

अवतीर्य नमस्कृत्य दृष्ट्वा लिङ्गं यतव्रतः ।
हस्तियानासनाश्वेभ्यश्शिवयोगी तपस्विनाम् ॥

मृगांश्चोष्ट्रवयो मत्स्यमांसं लशुनगृगतनम्? ।
अवकट्यार्तवीयानि कुत्सितांश्च विवर्जयेत् ॥

सर्वदानोग्रतपसामश्वमेधायुतस्य च ।
फलं प्राप्नोत्ययत्नेन मत्स्यमांसविवर्जनात् ॥

सर्वदोषाश्रयं मद्यं न पिबेच्छिवभक्तितः ।
क्वमद्यं क्व शिवेभक्तिः क्वमांसं क्व शिवार्चनम् ॥

सर्वतीर्थेषु यत्पुण्यं सर्वयज्ञेषु यत्फलम्।
तत्सर्वं लभते पुण्यं यो मद्यं परिवर्जयेत्॥

गर्भादि सर्वसंस्कारैश्श्मशानान्तैर्न भोजनम्।
रजस्वलाभिः संस्पृष्टं शिवभक्तो विवर्जयेत्॥

न गो ब्राह्मण भस्माग्नि लिङ्गच्छायां पदा स्पृशेत्।
न लङ्घयीत निर्माल्यमत्सु तिष्ठेन्ननग्नतः॥

वारयेच्छिवनिर्माल्यं भक्त्या लोभान्नभक्षयेत्।
भक्षणान्निरयं गच्चेत्तद्विलङ्घ्य च मूढधीः॥

न तस्य स्नानपूजाद्यं प्रतिगृह्णाति शङ्करः।
नैव नैवेद्यनिर्माल्यं मलभक् पूजयेच्छिवम्॥

भूप्रदेशं यथा कश्चित् स्वदेहमलभूषितम्।

नाश्रयीत तथा रुद्रो नरं निर्माल्यभूषितम् ॥

तस्मान्न संस्पृशेल्लिङ्गं नरो निर्माल्यदूषितः ।
असंस्पृश्यो भवेत् सोऽपि यो यस्याङ्गमलं ग्रसेत् ॥

यत्र नैवेद्य निर्माल्य सङ्कीर्णकलशादिभिः ।
स्नानादि क्रियते भक्त्या न तद् गृह्णाति शङ्करः ॥

मूर्तयोयाश्शिवस्याष्टौ तासु निन्दां विवर्जयेत् ।
गुरौ च शिवभक्तेषु नृपसाधु तपस्विषु ॥

अष्टम्यादिषु सर्वेषु पक्षयो रमयोरपि ।
श्वश्रुकर्माञ्जनाभ्यङ्ग मैथुनादिविवर्जयेत् ॥

कुर्याद्विशेषतः पूजां नक्तं चात्र समाश्रयेत् ।
स्त्रीशूद्रमत्स्यमांसादीन् यत्नात् पर्वसुवर्जयेत् ॥

त्रिकालमेककालं वा नित्यस्नानं समाचरेत् ।

शौचं च मृज्जलैः कुर्याद्गन्धलेपापनुत्तये ।

योऽश्नीयादन्नमश्नातः पापमद्यात् स केवलम् ।
तस्मात् स्नात्वा प्रभुञ्जीत भस्मना सलिलेन वा ॥

प्रातः स्नात्वाम्भसा गच्छेद्भस्मना वा शिवं पदम् ।
त्रिसन्ध्यमाचरेद्यस्तु शिवग्नि गुरुतत्परः ॥

पावकमुत्सृज्यत्रिसप्तकुलमुद्धरेत् ।?
कुर्यात्प्रतिचतुर्मासं महापूजाप्रवर्तनम् ॥

भोजनं शिवभक्तानां शक्त्यादानं च कल्पयेत् ।
त्रिसप्तकुलसंयुक्तः समस्तैश्वर्यसंयुतः ।
वसेच्छिवपुरे नित्यं चातुर्मास्य प्रवर्तनात् ॥

देवे सर्वोत्सवे श्राद्धे पुण्येषु दिवसेषु च ।
शिवं सम्पूज्य नैवेद्यैः भोजयेच्छिवयोगिनम् ॥

ऋषयः पितरः सर्वाश्च शिवमाश्रित्य संस्थिताः।
प्रीते शिवे तु ते सर्वे सुप्रीताः स्युर्न संशयः॥

ज्ञानवैराग्यसंछन्नं भस्मनिष्ठं जितेन्द्रियम्।
भोजयेच्छान्तमनसं श्राद्धेषु शिवयोगिनम्॥

पू। ७७(८०)

यदीश्वरादि तत्वानां परिज्ञानं विवेकतः॥

भवेत् साधर्म्य वैधर्म्यात् तस्य ज्ञानस्य लक्षणम्।
नानिष्टं द्वेष्टि संप्राप्तं न चेष्टमभिनन्दति।
प्रीतितापविषादानां वैराग्यादति वर्तते॥

न धर्मनिष्ठा प्रतिष्ठस्य दिवसेनापि यत्फलम्॥

नात(श्च)क्यं गृहस्थेन प्राप्तुं युगशतैरपि।
वश्येन्द्रियः प्रसन्नात्मा यो न द्वेष्टि न काङ्क्षति॥

शब्दादिविषयान् भोगान् स विज्ञेयो जितेन्द्रियः।
ज्ञानवैराग्यसम्पन्नः शिवश्शान्तेन चेतसम्॥

युक्तष्षडङ्गयोगेन शिवयोगी सकीर्तितः।
शिवधर्माद्भवेज्ज्ञानं ज्ञानाद्वैराग्यसंभवः॥

ज्ञानवैराग्ययुक्तस्य शिवयोगः प्रवर्तते।
शिवयोगाच्च सर्वज्ञः परिपूर्णस्सुनिर्वृतः॥

सर्वेषामेव भूतानां त्रैवर्णाः पुरुषावराः।
पुरुषेभ्यो द्विजश्रेष्ठाः द्विजेभ्यो ग्रन्थपारगाः॥

ग्रन्थविद्भिश्च विज्ञेयास्तेभ्यस्सूक्ष्मार्थचिन्तकाः।
अर्थविद्भिश्च नानार्थं प्रतियु(बु)द्धो विशिष्यते॥

नानार्थविद्भ्यः कोटिभ्यो विशिष्टः योगिनः स्मृताः।
योगिशकोटिकोटिभ्यो विशिष्टः शिवयोगिराट्।
योगज्ञा योगसिद्धाश्च पितरो योगसंभवाः॥

भुक्ते प्रीणन्ति ते तस्माद् विशिष्टशिशवयोगिभिः।
सर्वयज्ञतपोदानैः कृतैर्दत्तैश्च यत्फलम्।
तत्फलं लभते सर्वं सम्पूज्य शिवयोगिनम्॥

पञ्चाग्निर्द्रव्य कालात्मा दक्षिणाहवितृत्विजः।
ऋग्यजुः सामसंयोगाद्वेदयज्ञः प्रकीर्तितः॥

ब्रह्मचर्य जपोमौनं क्षान्तिराहारलाघवम्।
इत्येतत्तपसोरूपं सुघोरं पञ्चलक्षणम्॥

यद्यदिष्टं विशिष्टं च न्यायप्राप्तं च यद्भवेत्।
तत्तद्गुणवते देयमित्येतद्दानलक्षणम्॥

निवर्तनसहस्राढ्यां सर्वसस्यप्ररोहिणीम्।
दद्याद्भूमि जलोपेतां भूमिदानं तदुच्यते॥

एकच्छत्रां महीं कृत्वा द्विजेभ्यः प्रतिपादयेत्।

संपूर्णायां द्विजः कश्चित् महीदानं तदुच्यते ॥

कन्यामलङ्कृतां दद्याद्यज्विने गुणसंवृताम् ।
द्विजाय वेदविदुषे कन्यादानं तदुच्यते ॥

सर्वदोषविनिर्मुक्तां तरुणीं सुपयस्विनीम् ।
योगामलं कृतां दद्यात् तद्गोदानमुदाहृतम् ॥

मध्यमोत्तमवस्त्राणि यो दद्यादहतानि व ॥
एतत् समासतो ज्ञेयं वस्त्रदानस्य लक्षणम् ॥

प्। ७८(८१)

ब्रह्मचारी समाधिस्थः शान्तः शीलपरायणः ।
अहोरात्रे(न्न)भुञ्जीत उपवासस्य लक्षणम् ॥

चत्वारिंशत्समायुक्तं पिण्डानां हि शतद्वयम् ।
मासेनाद्याद्यथा काममिति चान्द्रायणं व्रतम् ॥ स्मृतम् ॥

ऋषिभिः सर्वशास्त्रज्ञैस्तपोनिष्ठैर्जितेन्द्रियैः।
देवैश्च सेवितं तोयं क्षितेस्तीर्थं तदुच्यते॥

रुद्रावतारस्थानानि पुण्यक्षेत्राणि निर्दिशेत्।
मृतानां तेषु रुद्रत्वं शिवक्षेत्रेषु देहिनाम्॥

दानान्यावसथं कूपमुद्यातं देवतालयम्।
तीर्थेष्वेतानि यः कुर्यात् सोऽक्षयं फलमाप्नुयात्॥

क्षान्तिः स्पृहा दया सत्यं दानं शीलं तपः श्रुतम्।
एतदष्टाङ्गमुद्दिष्टं परं पात्रस्य लक्षणम्।

यज्ञोपवासदानानि तपस्तीर्थफलानि च।
संपूर्णं लभते भक्तं सम्पूज्यशिवयोगिनम्॥

शिवेभक्तिः क्षमासत्यमशेषेन्द्रियसंयमः।
सर्वभूतेषु मैत्री च शिवधर्मस्य लक्षणम्॥

शिवयोगी शिवज्ञानी शिवधर्मरतश्च यः।
इत्येतत्त्रिविधं ज्ञेयं शिवपात्रस्य लक्षणम्॥

शिवमुद्दिश्य दातव्यमनपेक्ष्य गुणान्तरम्।
वित्तमीश्वरभक्तस्य शिवदानस्य लक्षणम्॥

शिवभक्तं द्विजश्रेष्ठं यः श्राद्धादिषु भोजयेत्।
कुलानां शतमुद्धृत्य शिवलोके महीयते।
बहुनात्र किमुक्तेन शिवभक्तन्तु भोजयेत्॥

शिवभक्तेन यद्भुक्तं साक्षाद्भुक्तं शिवेन तत्।
द्विजानां वेदविदुषां कोटिं संभोज्य यत्फलम्॥

यतये वीतरागाय भिक्षादानेन तत्समम्॥

तस्माच्छ्रद्धा विशेषेण पुण्येषु दिवसेषु च।
शिवमुद्दिश्य विप्रेन्द्रान् शिवभक्तांस्तु भोजयेत्॥

असंयतः संयतो वा सर्वावस्थां गतोऽपि वा ।
यो वा को वा शिवे भक्तः शिववत्पात्रमुत्तमम् ॥

संपर्कादर्थलोभाद्वा यो हि रुद्रं प्रपूजयेत् ।
सोऽपि यां गतिमाप्नोति न तां यज्ञशतैरपि ।
तस्मान्नत्म्याश्च पूज्यश्च रक्षणीयश्च सर्वदा ॥

नाममात्रप्रसक्तोऽपि क्षणार्थमपि यः शिवे ॥

समुनिस्समहासाधुः स योगी स शिवं व्रजेत् ।
ग्र(गृ)हेश्राद्धस्य यत्पुण्यमरण्ये तच्छताधिकम् ॥

प्। ७९(८२)

तन्नदीष्वयुतं ज्ञेयमनन्तं स्याच्छिवालये ।
निवेद्य यतये सम्यगासनं मृदुवेत्रजम् ॥

दारुदन्तमयं वापि सिंहासनपतिर्भवेत् ।
कौपीनाच्छादनं वासा निवेद्य शिवयोगिने ॥

युगकोटिसहस्राणि शिवलोके महीयते ।
और्णं प्रावरणं दत्वा विस्तीर्णं शिवयोगिने ॥

रोम्णिरोम्णिसुवर्णस्य दत्तस्य फलमश्नुते ।
मृगव्याघ्रादिकं चर्म तिलपिष्टममर्दितम् ॥

मृदुरक्तकषायेण यो दद्याच्छिवयोगिने ।
यावत् तद्रोमसंख्यानां मृगव्याघादि चर्मणि ॥

तावद् वर्षसहस्राणि शिवलोके महीयते ।
जलस्थलपवित्राणि यो दद्याच्छिवयोगिने ॥

त्राणार्थं सूक्ष्मजन्तूनामब्दलक्षं वसेद्दिवि ।
त्रिविष्टब्धसमायुक्तं यः प्रदद्यात् कमण्डलुम् ॥

महातपांसि यत् कृत्वा पुण्यं तत् सकलं भवेत्। लभेत् ।
मृदुवासश्च सुश्लष्णं प्राणि दोषविवर्जितम् ॥

निवेद्य शिवयोगिभ्यः सर्वयज्ञफलं लभेत् ।
मृद्भस्माधारपात्राणि वंशालाबु कृतानि च ॥

निवेद्य शिवयोगिभ्यस्सर्वतीर्थफलं लभेत् ।
दत्तयापनमुद्दिश्य निवेद्यशिवयोगिने ॥

दिव्यस्त्री भोगसंयुक्तं दिव्यरम्यं पुरं लभेत् ।
योगपट्टोपवीतानि निवेद्य शिवयोगिने ॥

वस्त्रयुग्मसहस्रस्य दत्तस्य फलमाप्नुयात् ।
मृद्वंशालाबुदार्वाद्यं सुकृतं भैक्षभोजनम् ॥

निवेद्य शिवयोगिभ्यः सदासत्रफलं लभेत् ।
शिवभक्ताय यो दद्यादुपानात् काष्ठपादुके ॥

स चराश्वसहस्रस्य दत्तस्य फलमाप्नुयात् ।
कल्माषदण्डं यो दद्यादन्नं वा शिवयोगिने ॥

बलावष्टम्भसंयुक्तं सस्यादण्डाग्रनायकः ।

तालवृन्तातपत्रं वा यो दद्याच्छिवयोगिने ॥

एकच्छत्रं स भुञ्जीत मण्डलं शतयोजनम् ॥

वाताश्रयविशेषेषु दण्डेषु शिवयोगिने ।

भवेत् क्षितिपतिश्श्रीमान् कुलाधारो गुणान्वितः ।

शिवज्ञानाभि युक्ताय यो दद्यात् पुस्तकं महत् ॥

युगकोटिशतं दिव्यं शिवलोके महीयते ।

भवेदिहागतः श्रीमान् सुखाढ्यो वेदपारगः ॥

प्। ८०(८३)

सर्वज्ञानार्थवक्ता च बृहस्पति समो भवेत् ।

शिवयोगी शिवज्ञानी शिवधर्मरतश्च यः ॥

शिवं संप्राप्य तुल्यात्मा सर्वतुल्यबलो भवेत् ।

यः कुर्यात्कारयेद्वापि वपनं शिवयोगिनाम् ॥

वर्षलक्षं महाभोगे शिवलोके महीयते ॥

रुद्रो रुद्राक्षदानेन भवतीति किमद्भुतम् ॥

तन्मालया सदाहस्ते रुद्रश्च क्रमते क्षितौ ।
रुद्राक्षणि स्वयं रुद्रो ये रुद्रानु चरास्सदा ॥

रुद्राक्षधारणात् तस्मादिह रुद्रः परत्र च ।
इति रुद्राक्षरुद्राणां धत्ते मालां सदाकरे ॥

शतार्धार्धप्रमाणेन रुरुद्रो नात्रसंशयः ।
जपंश्च रुद्रमन्त्राणां कोटिकोटि गुणो भवेत् ॥

मूर्ध्निहस्तो पवीते वा कृत्वा रुद्राक्षमालिकाम् ।
यस्य भुञ्जीतत्तद्भुक्तं स्वयं रुद्रैर्नसंशयः ॥

रुद्राक्षधारणात् तस्मान् नित्यमेव प्रशस्यते ।
परस्यानुग्रहार्थाय ब्राह्मणस्य विशेषतः ॥

यतिमात्रोपकरणं दत्वाल्पमतिभक्तितः ।
वर्षलक्षं महायानैश्शिवलोके महीयते ॥

कुर्यादावसथं सौख्यं गुप्तं च शिवयोगिनाम् ।
शिवालये तु ते यावत् तावत् पुण्यं विशेषतः ॥

यथा शिवस्तथा योगी यथा योगी तथा शिवः ।
तेन योगीन्द्रपात्रेषु दानमण्वपि चाक्षयम् ॥

यद्यद्यदोपयुज्येत तद्देयं तस्य यत्नतः ।
उपयोगप्रधानाभ्यां श्रेयस्तेनोभयोरपि ॥

व्याख्याने शिवधर्मस्य कृत्वा मण्डप(ल)मुत्तमम् ।
शोभितं पत्रपुष्पाद्यैर्न्यसेत् तत्रासनं गुरोः ॥

शोभितं वस्त्रपुष्पाद्यैश्शिवधर्मासनं महत्।

पुरतस्तद्गुरोः स्थाप्य पूजयेदुभयं ततः॥

शिवधर्मप्रवक्तारमाचार्यं वाचकं तथा।

पूजयेच्छिवधर्मं च तुल्यमेव द्वयं यतः॥

य एवं न्यायतो वक्ति शिवधर्मं शृणोति च।

आयुर्विद्यां यशः सौख्यं स लब्ध्वान्ते शिवं व्रजेत्॥

इत्येष वः समाख्यातश्शिवधर्मः सनातनः।

सर्वेषां शिवभक्तानां शिवधर्मं शृणोति च।

सर्वेषां शिवभक्तानामयं वाच्यो विशेषतः॥ विजानतः॥

शिवाश्रमेषु यो भक्त्या शिवधर्मं प्रकीर्तयेत्।

शृणुयाद्वापठेत् तस्य शास्त्रोक्तमखिलं फलम्॥

श्रुत्वैतदखिलं धर्ममाख्यातं ब्रह्मसूनुना।

चन्द्रात्रेय स गोत्राय शिवभक्ताय सारवित्॥

सारात्सारं समुद्धृत्य चन्द्रात्रेयेन धीमता।
उक्तं द्वादशमध्यायं धर्मशास्त्रं शिवात्मकम्॥

यावद्यस्योपदेशेन शिवधर्मं समाचरेत्।
तावत्तस्यापि तत् पुण्यमुपदेष्टुर्नसंशयः॥

उपदेशं विना तस्माद्धर्मो ज्ञातुं न शक्यते।
न च कर्तुमविज्ञानात् तस्मात् तुल्यं तयोः फलम्।
उपदेष्टानुमन्ता च कर्ताकारयिता च यः।
कृतानुपालकश्चैव पञ्चतुल्यफलाः स्मृताः॥

कर्तुरत्यधिकं पुण्यं तत्कृतं योऽनुपालयेत्।
यस्मादायतनं क्षिप्रं नाशं गच्छेदपालितम्॥

भूमिरत्नाश्च नागानां गो हिरण्यादि वाससाम्।
भवेत् पूर्वं हि दत्तानां दानाच्छ्रेयोनुपालनम्॥

दातुरभ्यदिकं पुण्यं तद्दत्तं यो नु पालयेत्।
अपालितं तु तद्यस्मात् तदहस्संप्रणश्यति॥

तस्मादुपदिशेद्धर्मं स्वयं चैव समाचरेत्।
कारयेदनुमन्येत कृतमन्यैश्च पालयेत्॥

इति पञ्चप्रकारोऽयं शिवधर्मः प्रकीर्तितः।
भद्राचलं रुद्रकोटि रविमुक्तं महालयम्।
गो कर्णं भद्रकर्णं च सुवर्णाक्षोऽयदीप्तिमान्।
स्थानं शिवस्य विख्यातं त्रिषुलोकेषु विश्रुतम्॥

स्थानाष्टकमिदं ज्ञेयं रुद्रक्षेममहोदयम्।
भद्रा चलादि स्थानानि रुद्रसायुज्यकारणम्॥

भागलण्डन्दुरण्डञ्च माकोटं मण्डलेश्वरः।
कारञ्जरं दारुवनं शंकुकर्णं स्थलेश्वरम्॥

पवित्राष्टकमित्येतन्महापुण्यप्रवर्धनम्।
मृताः प्रयान्ति तत्रैव शिवस्य परमं पदम्॥

गया चैव कुरुक्षेत्रं बभ्रुं कनकलं तथा।
विमलेश्वरोट्टहासं च महेन्द्रं भीममष्टमम्(कम्)॥

एतद्धुह्याष्टकं नाम सर्वपातकनाशनम्।(पापविमोचनम्)।
गत्वा तु पुरुषः श्रीमान् गत्वा तु शिवमन्दिरम्।
श्रीपर्वते हरिश्चन्द्र जल्पमात्रोदिकेश्वरः॥

मध्यमा च महाकालं केदारं भैरवं तहा।
एतद्धुह्याधिकं गुह्यमष्टकं परिकीर्तितम्॥

सन्तार्य तु पितॄन् सर्वान् शिवं शान्तपदं व्रजेत्।
अमरेश्वरं प्रभासं च नैमिशं पुष्करं तथा।
पाषण्डं दण्डिमुण्डि च भारभूतिं भवान्तिकम्॥

लकुटीश्वरोऽति विख्यातस्तथा प्रत्यात्मिको महान्।
प्रत्यात्मिकाष्टकमिदं क्षेत्रं रुद्रस्य कामिकम्॥

तत्र याति मृताः सर्वे रुद्रस्य परमं पदम्।
पुण्याष्टकमिदं ज्ञेयं शिवक्षेत्रस्य लक्षणम्।
दानान्यावसथं कूपमुद्यानं देवतालयम्॥

तीर्थेष्वेतेषु यः कुर्यात् सोऽक्षयं फलमाप्नुयात्।
क्षान्तिः स्पृहादयासत्यं दानं शीलं तपः श्रुतम्॥

एतदष्टांगमुद्दिष्टं परं पात्रस्य लक्षणम्।
इति पञ्चप्रकारोऽयं शिवधर्मः प्रकीर्तितः।
कपालमालिनं देवं महाकालं नमोस्तु ते॥

चन्द्रार्धमस्तकं नित्यं चर्मवासः सदा प्रियम्।
गजधर्मधरं नित्यं चण्डेश्वर नमोस्तु ते॥

त्रिशूलपाणे देवेश त्रिणेत्रत्रिदशेश्वर।

त्रिमूर्ते च महात्मानं त्रिपुरान्त नमोस्तु ते।
सर्वेश्वरं सर्वगतं सर्वज(ज्ञं) सर्वतो मुखम्।
सर्वत्रावस्थितं नित्यं सर्वव्यापिन् नमोस्तु ते॥

स्थूलसूक्ष्मविभागेन व्याप्तं येन चराचरम्।
अनन्तानादिमव्यक्तं व्यक्ताव्यक्त नमोऽस्तु ते॥

अनन्तं शाश्वतं नित्यं विश्वं ध्रुवमुमापतिम्।
श्रीकण्ठं सर्वकण्ठं च नीलकण्ठ नमोऽस्तु ते॥

विद्यामयी यस्य विद्या विद्यातीतं च यत्स्थितिम्।
सकलं निष्कलं चैव कलाहीन नमोस्तु ते॥

यो गाधिपो योगगम्यो योगात्मा योगसंभवः।
महायोगपरं नित्यं योगेश्वर नमोस्तु ते॥

सर्वतेजो मयं तेजस्तेजसामपि तैजसः।
तेजोनिधिश्च तेजात्मा तेजोऽतीत नमोस्तु ते॥

ओमित्येकाक्षरं यस्तु प्रख्यातं भुवनत्रये ।
तस्याप्यर्थपरो नित्यं सदाशिव नमोस्तु ते ॥

अर्धमात्रात् परार्धं तु तस्यार्धस्य परात्परम् ।
परात् परवरं शान्तं शान्तातीत नमोस्तु ते ॥

वालार्कशतभागस्य शतधाकल्पितस्य च ।
अनौपम्यमनामञ्च शिवशान्त नमोऽस्तु ते ॥

(अग्राह्यमिन्द्रियैर्वापि सर्ववस्तुविवर्जितम् ॥)
अनन्ता नादिमव्यक्तं देहस्थं देह वर्जितम् ।
हृदिस्थं सर्वभूतेषु व्योमस्थञ्च नमोऽस्तु ते ।
अग्राह्यमिन्द्रियैर्वापि सर्ववस्तु विवर्जितम् ।

प्। ८३(८६)

स तेजो गूढमात्मानं गुह्यानां गुह्यगोचरम् ॥

गुहावास सदानित्यं गुहानां गूढगोचर ।
गुहावास सदानित्यं गूढार्थं च नमोस्तु ते ॥

महादेवं महात्मानं महामाया परावरम् ।
महाज्ञानं परातीतं ज्ञानगम्य नमोस्तु ते ॥

एकाक्षरश्चतुर्भेदश्चतुर्मात्रैरलंकृतम् ।
चतुष्कलं कलातीतं विश्वातीतं नमोस्तु ते ।
ईशानं ईश्वरो ब्रह्मा सदाशिव नमोस्तु ते ॥

धर्माश्च काममोक्षाय सर्वभूतानुकम्पया ।
सर्वस्तरतु दुर्गाणि सर्वोभद्राणि पश्य तु ॥

सर्वस्सुगतिमाप्नो तु सर्वस्य भवतः शिवम् ।
सर्वस्सुगतिमाप्नोतु सर्वस्य भवतां शिवम् ।

इति श्रीशिवधर्मशास्त्रे नन्दिप्रोक्तायां संहितायां शिवविद्या
शाखोपशाखा समुद्देशो नाम द्वादशोध्यायः ॥

शिवधर्मस्समाप्तः ॥

ओं शिवायगुरवे नमः । शिवमस्तु । श्रीशिवाय नमः ॥